Digitization by eGangotri-South Center

मुंबई शिक्षणखात्याने मंजूर

संस्कृतवाग्रत्नहारः

(इंग्रजी सहाव्या व सातव्या इयत्तेकरितां)

सुधारलेली

तृतीयावृत्ति

18.4 cM

संग्राहक व संपादक

कृष्णाजी वामन चितळे.

सन १९४८.

मूल्य दीड रुपया.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृतवाग्वल्लभः

(इंग्रजी सहाव्या व सातव्या इयत्तेकरितां)

सुधारलेली

तृतीयावृत्ति

संग्राहक व संपादक

कृष्णाजी वामन चितळे, बी. ए. (ऑनर्स) बी. टी.

प्रमुख्याध्यापक व संस्कृत शिक्षक

छबिलदास लल्लुभाई बॉईज हायस्कूल, दादर, मुंबई.

सन १९४८.

मूल्य दीड रुपया.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकाशक
सौ. द्वारकाबाई कृष्णराव चितळे,
यत्नमंदिर,
१, डोंगरे बाग, दादर, मुंबई.

सर्व हक्क स्वाधीन.

मुद्रक
दिनानाथ पांडुरंग देशपांडे,
श्रीपाद प्रिंटिंग प्रेस, गिरगांव, मुंबई.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्यार्थ्यांकरितां.

कोणत्याही भाषेची जोपासना व अभिवृद्धी करावयाची असल्यास ती भाषा ज्या अन्य भाषेपासून जन्मली असेल त्या भाषेचा अभ्यास करणें जरूर असतें. या दृष्टीनें मराठी भाषेच्या अभ्यासकांना संस्कृत भाषेचें ज्ञान असणें जरूर आहे. दुय्यम शिक्षणाच्या अभ्यासक्रमांत संस्कृत भाषेचा अंतर्भाव करण्यांत इतर उद्देशाप्रमाणें हा एक उद्देश असावा.

दुय्यम शिक्षण देणाऱ्या इंग्रजी शाळांमधून संस्कृत भाषा शिकणाऱ्या सहाव्या व सातव्या इयत्तेंतील विद्यार्थ्यांचा अभिजात संस्कृत वाङ्मयाशीं परिचय होऊन आर्य संस्कृति व उत्कृष्ट विचार यांचाही त्यांच्या मनावर संस्कार व्हावा, या दृष्टीनें प्रस्तुत पुस्तकांतील उताऱ्यांची निवड केली आहे. कांहीं अनुवादित असले तरी बहुतेक सर्व उतारे प्रसिद्ध प्राचीन संस्कृत ग्रंथकारांच्या ग्रंथांतून घेतले असल्याकारणानें त्यांच्या वाचनानें विद्यार्थ्यांच्या मनांत संस्कृत वाङ्मयाबद्दल अभिरुची उत्पन्न होऊन ते ग्रंथ मुळांतूनच वाचण्याची इच्छा त्यांना व्हावी अशी अपेक्षा आहे.

पुष्कळ विद्यार्थी आरंभीच असा ग्रह करून घेतात कीं संस्कृत भाषा ही फार कठीण आहे. तेव्हां ती शिकण्याच्या भानगडींत आपण न पडणें चांगलें. परंतु थोडा विचार केल्यास हा ग्रह प्रथमच करून घेणें योग्य नाहीं असें ध्यानांत येईल. संस्कृत भाषेचें व्याकरण थोडेसें क्लिष्ट असलें तरी भाषा फारशी कठीण नाहीं. अल्प प्रयत्नानें ती सहज समजूं लागते. मुख्य गोष्ट आहे ती इच्छा व प्रयत्न या जोडीची. लांबच लांब सलग ओळ पाहिली कीं विद्यार्थी बिचकतो; पण थोड्या विचारानें असें कळून येईल कीं असें बिचकण्याचें कांहींच प्रयोजन नाहीं. संधि सोडवले व जरा वाचनाची संवय असली कीं तीच सलग ओळ सोपी वाटते. विद्यार्थ्यांना कठीण वाटणारा परिच्छेद शिक्षकांनीं वाचून दाखविला कीं तो सहज समजूं लागतो, असा नेहमींचा अनुभव आहे. हल्लीं उणीव भासते ती संस्कृत वाचनाची.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रस्तुत पुस्तकांतील उतारे न विचकतां वाचल्यानंतर वर उल्लेखिलेल्या गोष्टीची सत्यता विद्यार्थ्यांना पटेल. अभिजात वाङ्मयांतील हे निवडक उतारे विद्यार्थ्यांना संस्कृत भाषेची अभिरुची उत्पन्न करतील अशी खात्री वाटते. त्यांमध्यें ज्याप्रमाणें पहिल्या प्रतींचीं सुभाषितें आहेत, त्याचप्रमाणें उत्तमोत्तम वाक्प्रचारही आहेत. विद्यार्थ्यांनीं सुभाषितें अवश्य पाठ करावीं व वाक्प्रचार ध्यानांत ठेवावे. भाषांतराच्या वेळीं यांचा चांगला उपयोग होईल. अशा तऱ्हेचें पाठांतर करणें याची घोकंपट्टीमध्यें (Cram) गणना होत नाहीं. उलट हें भाषेच्या अभ्यासास पोषकच होतें.

प्रत्येक उताऱ्याच्या शेवटीं अभ्यासाकरितां कांहीं गोष्टी दिल्या आहेत. त्यांचा पाठाशीं संबंध असेलच असें नाहीं. पाठांतील विषयावर अभ्यासाच्या नमुन्याप्रमाणें शिक्षकांनीं प्रश्न विचारावे.

शेवटीं कांहीं मुद्रणदोष राहिले असल्यास त्याबद्दल वाचकांनीं क्षमा करावी. ते कळविण्याची विनंती आहे. म्हणजे पुढील आवृत्तीचा सुयोग आल्यास सुधारणा करणें सोपें होईल.

कृतज्ञता.

या उताऱ्यांच्या संकलनाची कल्पना पुष्कळ वर्षें मनांत वावरत होती. परंतु तिला मूर्त स्वरूप आज येऊं शकलें. हें मूर्त स्वरूप येण्यास ज्यांनीं मदत केली व ज्यांनीं कांहीं उपयुक्त सूचना केल्या त्या सर्वांचा मी आभारी आहे.

जनरल एज्युकेशन इन्स्टिटयूट, दादर या प्रमुख शिक्षणसंस्थेच्या सर्व शाळाधिकाऱ्यांनीं प्रस्तुत पुस्तक शाळांमधून चालू करण्याचें अभिवचन दिल्याबद्दल मी त्या सर्वांचा फार आभारी आहे. तसेंच कालावधी थोडा व कामाची गर्दी असूनही छपाईचें काम चांगल्या तऱ्हेनें व आपलेपणानें करून दिल्याबद्दल श्रीपाद प्रिंटिंग प्रेसचे व्यवस्थापक श्रीयुत देशपांडे यांचा मी आभारी आहे.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्राचीन प्रथितयश ग्रंथकारांच्या ग्रंथांतील जरी हे उतारे असले तरी त्यांचें हें संकलन कोणाला तरी अर्पण करण्याचा मोह आवरत नाहीं. कोणास अर्पण करावें ? असा प्रश्न मनांत उपस्थित झाल्यावर विचार असा सुचला कीं विद्यागुरूंना सुभाषितरत्नावलीची प्रथम कृती अर्पण केल्यावर वडीलमातुश्रींच्या पश्चात् ज्या आप्तस्नेह्यांचा आजपर्यंत जीवनावर परिणाम झाला त्यानांच अर्पण करणें योग्य. आप्तांमध्यें बंधुवर्ग श्रेष्ठ. सर्वांचेंच प्रत्यक्ष वा अप्रत्यक्ष साह्य झालें; पण त्यांतसुद्धां बंधुद्वयाच्या निर्व्याज व निर्हेतुक प्रेमाला मोल नाहीं. त्याप्रमाणेंच स्नेहीवर्गाची गोष्ट. त्यांत कांहीं माझे शिक्षणांतील समव्यवसायी आहेत, तर कांहीं अन्यव्यवसायी असून निष्काम व अकृत्रिम स्नेह करणारे आहेत. या सर्वांच्या अमूल्य प्रेमाबद्दल हा संस्कृतवाग्रत्नहार मी त्यांना अर्पण करून अंतःकरणांतील कृतज्ञता व्यक्त करतों.

डोंगरे बाग, दादर, मुंबई
ता. १-५-४१.

कृ. वा. चितळे.

* * *

द्वितीयावृत्ति पुनर्मुद्रण

१४-६-१९४४

तृतीयावृत्ति

शेवटीं दोन उतारे जास्त घालून ही आवृत्ति वाढविली आहे.

दि. १-६-१९४८.

संग्राहक.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुक्रमणिका.

	विषयः	पृष्ठम्
१	मङ्गलाचरणम् ।	१
२	राजा विष्णुशर्मणे पुत्रान्समर्पयति ।	२
३	नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।	३
४	उपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत् ।	४
५	रघुवंशप्रस्तावना ।	४
६	अतिलोभाद्बको मृतः ।	६
७	मालविकाग्निमित्रप्रस्तावना ।...	६
८	सिंहशशकयोः ।	७
९	पण्डितलक्षणानि ।	८
१०	शक्तेर्युक्तिर्बलीयसी ।	१०
११	नीलवर्णस्य शृगालस्य ।	१०
१२	मूढलक्षणानि ।	११
१३	त्रयाणां मत्स्यानाम् ।	१२
१४	अज्ञातकुलशीलस्य वासो न देयः ।	१४
१५	ययातितारुण्यम् ।	१५
१६	भोजनसमारंभः ।...	१६
१७	यौवनप्रभावः ।	१८
१८	नन्दिनीहरणम् ।	१९
१९	सावित्रीकथा । (प्रथमो भागः)	२२
२०	मृत्यगुणाः ।	२४
२१	महाश्वेताजन्म ।	२५
२२	सावित्रीकथा । (द्वितीयो भागः)	२६
२३	सर्वशक्तिमान् परमेश्वरः ।	३२
२४	सावित्रीकथा । (तृतीयो भागः)	३२
२५	रत्नावलीप्रस्तावना ।	३४

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२६	राजवाहनजन्म ।	३५
२७	सोमदत्तकथा ।	३६
२८	शाकुन्तलप्रस्तावना ।	३७
२९	निर्विण्णो विदूषकः ।	३९
३०	विश्वस्तेऽपि न विश्वसेत् ।	४०
३१	क्षात्रेयीवासन्त्योः संवादः ।	४३
३२	पुष्पोद्भवकथा ।	४७
३३	चन्द्रापीडस्य विद्याग्रहणम् ।	४८
३४	उपहारवर्मजन्मकथा ।	४९

द्वितीयः खण्डः ।

३५	दिलीपो नन्दिनीमाराधयति ।	५१
३६	सिंहदिलीपयोः संवादः ।	५३
३७	संजीवनीविद्याग्रहणम् ।	५६
३८	मुमूर्षुः पिता हर्षदेवं पश्यति ।	५७
३९	शवरजीवनम् ।	५८
४०	अन्योक्तयः ।	५९
४१	सेयं याति शकुन्तला पतिगृहम् ।	६०
४२	दारिद्र्यदुःखम् ।	६६
४३	अश्वहरणम् ।	६९
४४	वैराग्यगुणाः ।	७०
४५	वाग्युद्धम् ।	७२
४६	अजविलापः ।	७८
४७	मातङ्गकथा ।	८०
४८	सीतात्यागः ।	८२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४९	सामान्यनीतिः ।	८६
५०	शकुन्तलाप्रत्याख्यानम् ।	८९
५१	शूद्रकः शुकं स्ववृत्तान्तं पृच्छति ।	९५
५२	हिमालयवर्णनम् ।	९६
५३	पञ्जरस्थः शुको जाबाल्याश्रमं वर्णयति ।	९७
५४	शुकनासवर्णनम् ।	९८
५५	पत्रलेखावर्णनम् ।	९९
५६	मदनदहनम् ।	१००
५७	उर्वशीविमोचनम् ।	१०२
५८	यक्षमन्दिरम् ।	१०५
५९	यक्षपत्नीवर्णनम् ।	१०७
६०	सर्वदमनचापलम् ।	१०८
६१	गङ्गास्तुतिः ।	११३
६२	जाबालिवर्णनम् ।	११५
६३	युधिष्ठिरं प्रति द्रौपदीवाक्यम् ।	११७
६४	शुकनासोपदेशः ।	११९
६५	कौत्साय गुरुदक्षिणाप्रदानम् ।	१२३
६६	छात्रोपदेशः ।	१२६
६७	प्रार्थना शान्तिः ।	१२७
६८	बालबोधिनी ।	१२८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृतवाग्रत्नहारः

* मङ्गलाचरणम् *

ॐकाररूपं वरदं भक्तानामार्तिनाशकम् ।
मङ्गलं मङ्गलानां च नमामि गणनायकम् ॥ १ ॥
ततो सरस्वतीं वन्दे वाग्देवीमघमर्षिणीम् ।
बुद्धिमान्द्यविनाशाय परत्रेह च श्रेयसे ॥ २ ॥
नानाकारं निराकारं निष्कामं कामदायकम् ।
सगुणं निर्गुणं चापि तं वन्दे शेषशायिनम् ॥ ३ ॥
पद्मस्थां पद्मवर्णाभां पद्मपत्रायतेक्षणाम् ।
पद्माभिधानां तां देवीं नमाम्यैश्वर्यदायिनीम् ॥ ४ ॥
वामाङ्के पार्वती यस्य दक्षिणाङ्के गजाननः ।
गङ्गाधरं त्रिनेत्रं च तं वन्दे वृषवाहनम् ॥ ५ ॥
जनकं वामनं वन्दे लक्ष्मीं च जननीं तथा ।
विद्यागुरुं त्र्यम्बकं च वैयाकरणभूषणम् ॥ ६ ॥
वाग्रूपिण्यै सरस्वत्यै भक्तियुक्तेन चेतसा ।
वाङ्मयाकृष्टरत्नानां रत्नहारः समर्प्यते ॥ ७ ॥
सोऽयं कल्पेत छात्राणां सुलभो मार्गदर्शकः ।
मन्दिरं प्रविविक्षूणां वाग्देव्याः सर्वकामदम् ॥ ८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२ राजा विष्णुशर्मणे पुत्रान्समर्पयति ।

परिचयः—पंचतंत्र या ग्रंथाच्या नमुन्यावर हितोपदेश हा ग्रंथ नारायणपंडितानें रचिला. यांत पंचतंत्र व तत्सदृश दुसऱ्या ग्रंथांतील गोष्टींचा समावेश केला असून सुदर्शन राजाच्या मुलांना नीति व व्यवहार शिकविण्याकरितां त्या गोष्टी पंडित विष्णुशर्म्यानें सांगितल्या आहेत. हितोपदेशाची प्रस्तावना पुढील उतान्यांत आहे.

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ १ ॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥ २ ॥

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥ ३ ॥
स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ ४ ॥
वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च ॥ ५ ॥

तत्कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम् ।

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥ ६ ॥
रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् । राजोवाच । भो भोः पण्डिताः श्रूयताम् । अस्ति कश्चिदेवंभूतो विद्वान्यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः । यतः ।

काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम् ।
तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् ॥ ८ ॥

अत्रान्तरे विष्णुशर्मा नाम महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञोऽब्रवीत् । देव महाकुलसंभूता एते राजपुत्राः । तन्मया नीतिं ग्राहयितुं शक्यन्ते । षण्मासाभ्यन्तरे तव पुत्रान्नीतिशास्त्राभिज्ञान् करिष्यामि ।

राजा सविनयमुवाच ।

कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ९ ॥

तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् । इत्युक्त्वा तस्मै विष्णुशर्मणे बहुमानपुरःसरं पुत्रान्समर्पितवान् ।

हितोपदेशः ।

अभ्यासः—या पाठांत आलेले श्लोक पाठ करावे. तीं चांगलीं सुभाषितें आहेत.

---

२ नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।

अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तत्र तेन मुनिना काकेन नीयमानो मूषिकशावको दृष्टः । ततः स्वभावदयात्मना तेन मुनिना रक्षितो नीवारकणैः संवर्धितश्च । ततो बिडालस्तं मूषिकं खादितुमुपधावति । तमवलोक्य मूषिकस्तस्य मुनेः क्रोडे प्रविवेश । ततो मुनिनोक्तम् । मूषिक त्वं मार्जारो भव । ततः स बिडालः कुक्कुरं दृष्ट्वा पलायते । ततो मुनिनोक्तम् । कुक्कुराद्बिभेषि । ततस्त्वमेव कुक्कुरो भव । स च कुक्कुरो व्याघ्राद्बिभेति । ततस्तेन मुनिना कुक्कुरो व्याघ्रः कृतः । अथ तं व्याघ्रं मुनिर्मूषिकोऽयमिति पश्यति । अथ तं मूषिकं व्याघ्रीभूतं दृष्ट्वा सर्वे वदन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनेन मुनिना मूषिको व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रोऽचिन्तयत् । यावदनेन मुनिना स्थीयते तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते । इत्यालोच्य मूषिकस्तं मुनिं हन्तुं गतः । ततो मुनिना तज्ज्ञात्वा पुनर्मूषिको भवेत्युक्त्वा मूषिक एव कृतः ।

हितोपदेशः ।

अभ्यासः—१ पाठांत आलेलीं क्रियापदें वर्तमानकाळांत चालवा.
२ भी—भिणें याचा वाक्यांत उपयोग करतांना ज्यापासून भीति त्या शब्दाची पंचमी विभक्ति योजतात.

---

४ उपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत् ।

अस्त्युत्तरापथे गृध्रकूटनाम्नि पर्वते महान्पिप्पलवृक्षः । तत्रानेकबका निवसन्ति । तस्य वृक्षस्याधस्ताद्बिवरे सर्पो बालापत्यानि खादति । अथ शोकार्तानां बकानां विलापं श्रुत्वा केनचिद्बकेनाभिहितम् । एवं कुरुत । यूयं मत्स्यानुपादाय नकुलविवरादारभ्य सर्पविवरं यावत्पङ्क्तिक्रमेण विकिरत । ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावद्वेष्याद्व्यापादयितव्यश्च । तथानुष्ठिते तद्वृत्तम् । ततस्तत्र वृक्षे नकुलैर्बकशावकशब्दः श्रुतः । पश्चात्तैर्वृक्षमारुह्य बकशावका भक्षिताः ।

हितोपदेशः ।

अभ्यासः—१ वाक्प्रचार—तथानुष्ठिते तद्वृत्तम् ।
२ पाठांतील भू. का. वाचक धातुसाधितें सांगा.

---

५ रघुवंशप्रस्तावना ।

परिचयः—रघुवंश हें कालिदासाचें एक श्रेष्ठ काव्य आहे. कालिदास हा फार श्रेष्ठ कवी होता. त्यानें रघुवंश, कुमारसंभव वगैरे काव्यें व विक्रमोर्वशीय, शाकुंतल अशीं उत्कृष्ट नाटकें लिहिलीं. उपमा अलंकार योजण्यांत त्याची फार प्रसिद्धी. 'उपमा कालिदासस्य' हा श्लोक प्रसिद्ध आहे. रघुवंशाच्या प्रस्तावनेदाखल लिहिलेले श्लोक पुढील उताऱ्यांत आहेत.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ २ ॥
मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले मोहादुद्बाहुरिव वामनः ॥ ३ ॥
अथवा कृतवाग्द्वारे वंशेस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥
त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७ ॥
शैशवेभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ ८ ॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥

रघुवंशे प्रथमः सर्गः ।

अभ्यासः—१ क्व-क्व यांचा उपयोग दोन गोष्टींत फार फरक दाखवितो. द्वौ कौ महदन्तरं सूचयतः । उदा० क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।

२ समास सोडवाः—पितरौ, पार्वतीपरमेश्वरौ.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६ अतिलोभाद्बकोमृतः ।

अस्ति मालवदेशे पद्मगर्भनामधेयं सरः । तत्रैको वृद्धो बकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित्कुलीरकेण दृष्टः पृष्टश्च । किमिति भवानाहारत्यागेन तिष्ठति । बकेनोक्तम् । मत्स्या ममजीवनहेतवः । ते धीवरैरागत्य व्यापादयितव्या इति वार्ता नगरोद्यानेतं मया श्रुता । अतोऽन्नाभावादेवास्मन्मरणमुपस्थितमिति ज्ञात्वाऽऽहारेऽपि मयाऽनादरः कृतः । ततो मत्स्यैरालोचितम् । अस्मिन्समये तावदुपकारक एवायं लक्ष्यते । तदयमेव यथाकर्तव्यं पृच्छ्यताम् । मत्स्या ऊचुः । भो बक, कोऽत्र रक्षणोपायः । बको ब्रूते । अस्ति रक्षणोपायो जलाशयान्तराश्रयणम् । तत्राहमेकैकशो युष्मान्नयामि । मत्स्या आहुः । एवमस्तु । ततोऽसौ बकस्तान्मत्स्यानेकैकशो नीत्वा भक्षयति । अनन्तरं कुलीरकस्तमुवाच । भो बक, मामपि तत्र नय । ततो बकोप्यपूर्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान् । कुलीरकोऽपि तत्स्थलं मत्स्यास्थिसंकीर्णमालोक्याचिन्तयत् । हा हतोऽस्मि मन्दभाग्यः । भवतु । इदानीं-समयोचितं व्यवहरिष्यामि । इत्यालोक्य कुलीरस्तस्य ग्रीवां चिच्छेद । तेन स बकः पञ्चत्वं गतः ।

हितोपदेशः ।

अभ्यासः—१ वाक्प्रचार—पञ्चत्वं गतः; यथाकर्तव्यम्.

२ शब्द चालवाः—सरस्, युष्मद्.

३ ओळखाः—उवाच, चिच्छेद, आहुः

---

७ मालविकाग्निमित्रप्रस्तावना ।

परिचयः—मालविकाग्निमित्र हें कालिदासाचें पहिलें नाटक. त्याची प्रस्तावना पुढील उताऱ्यांत आहे. जुनें तें सोनें असा नियम नाहीं वगैरे विचार यांत आहेत.

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) मारिष, इतस्तावत् ।

(प्रविश्य)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पारिपार्श्वकः—भाव, अयमस्मि ।

सूत्रधारः—अभिहितोऽस्मि विद्वत्परिषदा कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन्वसन्तोत्सवे प्रयोक्तव्यमिति । तदारभ्यतां संगीतम् ।

पारिपार्श्वकः—मा तावत् । प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः ।

सूत्रधारः—अयि विवेकश्रान्तमभिहितम् । पश्य ।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥ १ ॥

पारिपार्श्वकः—आर्यमिश्राः प्रमाणम् ।

सूत्रधारः—तेन हि त्वरतां भवान् ।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम् ।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम् ॥ २ ॥

(इति निष्क्रान्तौ)

मालविकाग्निमित्रम् ।

अभ्यासः—१ सुभाषितें कोणतीं आहेत ?

२ समास सोडवाः—विवेकश्रान्तम्, प्रथितयशसाम्, सेवादक्षः ।

---

८ सिंहशशकयोः ।

अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः । स च सर्वदा पशूनां वधं कुर्वन्नास्ते । ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः । मृगेन्द्र किमर्थमेकदा बहुपशुघातः क्रियते । यदि प्रसादो भवति तदा वयमेव भवदाहाराय प्रत्यहमेकैकं पशुमुपढौकयामः । ततः सिंहेनोक्तम् । यद्येतदभिमतं भवतां तर्हि भवतु तत् । ततः प्रभृत्येकैकं पशुमुपकल्पितं भक्षयन्नास्ते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ कदाचिद्वृद्धशशकस्य वारः समायातः । सोऽचिन्तयत् । यद्यहं पञ्चत्वं गमिष्यामि तर्हि किं मे सिंहानुनयेन । तन्मन्दं मन्दं गच्छामि । ततः सिंहोऽपि क्षुधापीडितः कोपात्तमुवाच । कुतस्त्वं विलम्ब्य समागतोऽसि । शशकोऽब्रवीत् । देव नाहमपराधी । आगच्छन्पथि सिंहान्तरेण बलाद्धृतः । तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतोऽस्मि । सिंहः सकोपमाह । सत्वरं गत्वा दुरात्मानं दर्शय क्व स दुरात्मा तिष्ठति । ततः शशकस्तं गृहीत्वा गभीरकूपं दर्शयितुं गतः । तत्रागत्य स्वयमेव पश्यतु स्वामीत्युक्त्वा तस्मिन्कूपजले तस्य सिंहस्य प्रतिबिम्बं दर्शितवान् । ततोऽसौ क्रोधाध्मातहृदयो दर्पात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः । अतोऽहं ब्रवीमि ।

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ १ ॥

हितोपदेशः ।

अभ्यासः—१ समास—प्रत्यहम्, क्रोधाध्मातहृदयः ।
२ वाक्प्रचार—मे सिंहानुनयेन किम् । शपथं कृत्वा ।

---

९ पण्डितलक्षणानि ।

परिचयः—मूळ ग्रंथ भारत. हा महर्षि व्यासानीं लिहिला. त्यावर आणखी संस्करणें होऊन त्याचें महाभारत झालें. यांत प्रामुख्यानें कौरवपांडवांच्या भारतीय युद्धाचें वर्णन आहे. या ग्रंथांत प्रसंगानुरोधानें पुष्कळ कथा सांगितल्या आहेत व ठिकठिकाणीं पुष्कळ विषयांचें विवेचन केलें आहे. खालील श्लोकांत शहाण्या मनुष्याची लक्षणें सांगितलीं आहेत.

निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणम् ॥ १ ॥
क्रोधो हर्षश्च दर्पश्च ह्रीस्तम्भो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ २ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ ३ ॥
यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥ ४ ॥
यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पण्डित उच्यते ॥ ५ ॥
यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
न किञ्चिदवमन्यन्ते नराः पण्डितबुद्धयः ॥ ६ ॥
क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।
नासंपृष्टो व्युपयुङ्क्ते परार्थे तत्प्रज्ञानं प्रथमं पण्डितस्य ॥ ७ ॥
नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥ ८ ॥
निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥ ९ ॥
आर्य[illegible] रज्यन्ते भूतिकर्माणि कुर्वते ।
हितं च [illegible]सूयन्ति पण्डिता भरतर्षभ ॥ १० ॥
न हृष्यत्यात्मसम्माने नावमानेन तप्यते ।
गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥ ११ ॥
तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥ १२ ॥
प्रवृत्तवाक् चित्रकथ ऊहवान् प्रतिभानवान् ।
आशु ग्रन्थस्य वक्ता च यः स पण्डित उच्यते ॥ १३ ॥
श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ॥ १४ ॥

महाभारते उद्योगपर्वणि अध्यायः ३३

अभ्यासः—१ शब्द चालवा—ह्री, वाच्, आपद्, कर्मन्.
२ ओळखा—चिकीर्षन्ति, गाङ्गः, ऊहवान्.
३ समास—यथाशक्ति, प्रज्ञानुगम्, असंभिन्नार्यमर्यादः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१० शक्तेर्युक्तिर्बलीयसी ।

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म । यद्ययं केनाप्युपायेन म्रियते तदाऽस्माकमेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति । तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम् । मया बुद्धिप्रभावादस्य मरणं साधयितव्यम् । अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच । देव, दृष्टिप्रसादं कुरु । हस्ती ब्रूते । कस्त्वम् । कुतः समायातः । सोऽवदत् । जम्बूकोऽहम् सर्वैर्वनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः । यद्विना राज्ञाऽवस्थातुं न युक्तम् । तदत्राटवीराज्येऽभिषेक्तुं भवान्सर्वस्वामिगुणोपेतो निरूपितः । यतः ।

यः कुलाभिजनाचारैरतिशुद्धः प्रतापवान् ।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ १ ॥

अपरं च ।

राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ।
राजन्यसति लोकेऽस्मिन्कुतो भार्या कुतो धनम् ॥ २ ॥

तद्यथा लग्नवेला न विचलति तथा कृत्वा सत्वरमागम्यतां देवेन । इत्युक्त्वोत्थाय चलितः । ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन्महापङ्के निमग्नः । ततस्तेन हस्तिनोक्तम् । सखे शृगाल, किमधुना विधेयम् । पङ्के निपतितोऽहं म्रिये । परावृत्य पश्य । शृगालेन विहस्योक्तम् । देव, मम पुच्छकावलम्बनं कृत्वोत्तिष्ठ । यन्मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तदनुभूयतामशरणं दुःखम् । ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः ।

हितोपदेशः ।

अभ्यासः—१ चिन्तयन्ति स्म । स्म चा उपयोग दुसऱ्या वाक्यांत करा. अर्थ कोणत्या काळीं होतो ?

११ नीलवर्णस्य शृगालस्य ।

अस्ति कस्मिंश्चिदरण्ये कश्चिच्छृगालः स्वेच्छया नगरोपान्ते ग्राम्यन्नीलीभाण्डे पतितः । पश्चात्तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत् संदर्श्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्थितः । अथ नीलीभाण्डस्वामिना मृत इति ज्ञात्वा तस्मात्समुत्थाप्य दूरे नीत्वाऽपसारितस्तस्मात्पलायितः । ततोऽसौ वनं गत्वा स्वकीयं नीलवर्णमवलोक्याचिन्तयत् । अहमिदानीमुत्तमवर्णः । तदाहं स्वकीयोत्कर्षं किं न साधयामि । इत्यालोच्य शृगालानाहूय तेनोक्तम् । अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः । तदद्यारभ्यारण्येऽस्मदाज्ञया व्यवहारः कार्यः । शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टाङ्गपातं प्रणम्योचुः । यथाऽऽज्ञापयति देवः । इत्यनेनैव क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव । ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितम् । ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान्प्राप्य सदसि शृगालानवलोक्य लज्जमानेनावज्ञया स्वज्ञातयः सर्वे दूरीकृताः । ततो विषण्णान् शृगालानवलोक्य केनचिद्वृद्धशृगालेनैतत्प्रतिज्ञातम् । मा विषीदत । यदनेनानभिज्ञेन नीतिविदो मर्मज्ञा वयं स्वसमीपाद्दूरीकृतास्तद्यथाऽयं नश्यति तथा विधेयम् । यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते । तद्यथाऽयं परिचितो भवति तथा कुरुत । तत्र चैवमनुष्ठेयम् । यतः सर्वे संध्यासमये संनिधाने महारावमेकदैव करिष्यथ । ततस्तं शब्दमाकर्ण्य जातिस्वभावात्तेनापि शब्दः कर्तव्यः । ततस्तथानुष्ठिते सति तेन शृगालेन शब्दः कृतः । तस्माच्छब्दात्तं शृगालं परिज्ञाय स व्याघ्रेण हतः ।

हितोपदेशः ।

अभ्यासः— १ असदाज्ञया, वर्णमात्रविप्रलब्धाः हे समास सोडवा.
२ ओळखा—विषण्णः; समुत्थाप्य ।
३ वाक्प्रचार—यथाऽऽज्ञापयति देवः । तथानुष्ठिते ।

---

१२ मूढलक्षणानि ।

अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ॥ १ ॥
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥ २ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकामान्कामयति यः कामयानान्परित्यजेत् ।
बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ३ ॥
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ४ ॥
अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ ५ ॥
परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुद्ध्यत्यनीशानः स च मूढतमो नरः ॥ ६ ॥
आत्मनो बलमज्ञाय धर्मार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ ७ ॥
अशिष्यं शास्ति यो राजन्यश्च शून्यमुपासते ।
कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥ ८ ॥
एकः सम्पन्नमश्नाति वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भृत्येभ्यो को नृशंसतरस्ततः ॥ ९ ॥

महाभारते उद्योगपर्वणि अध्यायः ३३

अभ्यासः—१ द्विष्, हिंस्, श्वस्, वस्, अश् हे धातु वर्तमानकाळीं चालवा.

२ वाक्यांत योजा—अधि+स्था, वि+श्वस्.

३ ओळखा—प्रेप्सुः, अनीशानः, आहुः ।

४ समास सोडवा—अमित्रः, मूढचेतसम् ।

---

१३ त्रयाणां मत्स्यानाम् ।

परिचयः—पंचतंत्र हा एक उपयुक्त व मनोरंजक ग्रंथ आहे. अमरशक्ति नांवाच्या राजानें आपले मुलगे विष्णुशर्मा नांवाच्या एका पंडिताच्या स्वाधीन करून त्यास सांगितलें कीं यांना सुविद्य करा. विष्णुशर्म्यानें राजपुत्रांना व्यवहारकुशल बनविण्यासाठीं पशुपक्षांच्या गोष्टी त्यांना सांगितल्या. त्या सर्व या पंचतंत्रांत आहेत.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कस्मिंश्चिज्जलाशयेऽनागतविधात्रा प्रत्युत्पन्नमतिर्यद्भविष्यश्चेति त्रयो मत्स्याः सन्ति । अथैकदा तं जलाशयं दृष्ट्वाऽऽगच्छद्भिर्मत्स्यजीविभिरुक्तम् । अहो बहुमत्स्योऽयं ह्रदः । कदाचिदपि नास्माभिरन्वेषितः । तदद्याहारवृत्तिः संजाता । संध्यासमयश्च संप्राप्तः । ततः प्रभातेऽत्रागन्तव्यमिति निश्चयः । अत्रान्तरे तत्कुलिशपातोपमं वचः समाकर्ण्यानागतविधाता सर्वान्मत्स्यानाहूयेदमूचे । अहो श्रुतं भवद्भिर्यन्मत्स्यजीविभिरभिहितम् । तद्रात्रावपि गम्यतां किञ्चिन्निकटं सरः । उक्तं च ।

अशक्तैर्वलिनः शत्रोः कर्तव्यं प्रपलायनम् ।
संश्रितव्योथवा दुर्गो नान्या तेषां गतिर्भवेत् ॥ १ ॥

तन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागम्य मत्स्यसंक्षयं करिष्यन्ति । तन्न युक्तं साम्प्रतं क्षणमप्यत्रावस्थातुम् । तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह । अहो सत्यमभिहितं भवता । ममाप्यभीष्टमेतत् । तदन्यत्र गम्यतामिति । उक्तं च ।

यस्यास्ति सर्वत्र गतिः स कस्मात्स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति ॥२॥

अथ तत्समाकर्ण्य प्रोच्चैर्विहस्य यद्भविष्यः प्रोवाच । अहो न भवद्भ्यां मन्त्रितं सम्यगेतदिति । यतः किं वाऽत्रेणापि तेषां पितृपैतामहिकमेतत्सरस्त्यक्तुं युज्यते । तद्यद्यायुःक्षयोऽस्ति तदन्यत्रगतानामपि मृत्युर्भविष्यत्येव । उक्तं च ।

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति ॥३॥

तदहं न यास्यामि । भवद्भ्यां यत्प्रतिभाति तत्कार्यम् । अथ तस्य तं निश्चयं ज्ञात्वाऽनागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन । अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तज्जलाशयमालोड्य यद्भविष्येण सह जलाशयो निर्मत्स्यतां नीतः । अतोऽहं ब्रवीमि ।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ ४ ॥

पञ्चतन्त्रम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः—१ माशांचीं नांवें अन्वर्थक आहेत. त्यांचा अर्थ काय ?
२ समास—निर्मत्स्यता । कापुरुषाः । कुलिशपातोपमम् ।

---

१४ अज्ञातकुलशीलस्य वासो न देयः ।

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किञ्चिदुद्धृत्य ददति । तेनासौ जीवति । अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तम् । कोऽयमायाति । दीर्घकर्णो गृध्रमालोक्य सभयमाह । हा हतोस्मि । अधुनाऽस्य संनिधाने पलायितुमक्षमः । किं करोमि ।

तावद्भयात्तु भेतव्यं यावद्भयमनागतम् ।
आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम् ॥ १ ॥

तद्यथा भवितव्यं तद्भवतु । तावद्विश्वासं समुत्पाद्य समीपमुपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् । आर्य त्वामभिवन्दे । गृध्रोऽवदत् । कस्त्वम् । सोऽवदत् । मार्जारोऽहम् । गृध्रो ब्रूते । दूरमपसर । नो चेद्धन्तव्योऽसि मया । मार्जारोऽवदत् । श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः । यतः ।

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ २ ॥

गृध्रो ब्रूते । ब्रूहि किमर्थमागतोऽसि । सोऽवदत् । अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । यूयं धर्मज्ञानरता विश्वासभूमय इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः ।

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ३ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥ ४ ॥

गृध्रोऽवदत् । मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम् । परस्परं विवदमानानामपि धर्मशास्त्राणां ' अहिंसा परमो धर्म ' इत्यत्रैकमत्यम् ।

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः ।

ततो दिनेषु गच्छसु स पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निसृत्य बहिः पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं त ऊचुः । अनेनैव जरद्गवेनास्माकं शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः । अतोऽहं ब्रवीमि ।

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ ५ ॥

पंचतंत्रम् ।

अभ्यासः—१ चान्द्रायणव्रत म्हणजे काय ?

२ ओळखा—जिज्ञासा, समारब्धा, निःसृत्य ।

३ वाक्प्रचार—भूमिं स्पृष्ट्वा कर्णौ स्पृशति । दिनेषु गच्छसु ।

---

१५ ययातितारुण्यम् ।

परिचयः—प्रसिद्ध अठरा पुराणांपैकीं विष्णुपुराण हें एक आहे. ययाति राजानें आपल्या मुलाचें तारुण्य घेऊन जगांतील सुखें अनुभविलीं तरी त्याची तृप्ति झाली नाहीं.

राज्ञो नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः । तेषां नामानि यतिर्ययातिः संयातिरायातिर्वियतिः कृतिरिति । यतिस्तु राज्यं नैच्छत् । ययातिस्तु भूभृदभूत् । दैत्यगुरोः शुक्राचार्यस्य दुहितरं देवयानीं शर्मिष्ठां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च वार्षपर्वणीमुपयेमे । देवयानी द्वौ सुतौ यदुतुर्वसू व्यजनयत् शर्मिष्ठा च द्रुह्युमणुं पूरुं च । उशनसः शापाच्चाकालेनैव ययातिर्जरामवाप । प्रसन्नशुक्रवचनाच्च स जरां संक्रमयितुं ज्येष्ठं पुत्रं यदुमुवाच । अकालेनैव कविशापाज्जरा मामुपस्थिता । तामहं तस्यैवानुग्रहाद्भवतः संचारयाम्येकं वर्षसहस्रम् । न तृप्तोऽस्मि विषयेषु । त्वद्वयसाहं भोगान् भोक्तुमिच्छामि । नात्र भवतः प्रत्याख्यानं कर्तव्यम् । इत्युक्तः स नैच्छत्तां जरामादातुम् । ययातिस्तं शशाप । त्वत्प्रसूतिर्न राज्यार्हा भविष्यतीति । अनन्तरं स राजा क्रमेण द्रुह्युं तुर्वसुमणुं च जराग्रहणार्थं स्वयौवनप्रदानाय च चोदयामास । तैश्च प्रत्याख्यातस्तान् सर्वान् शशाप ।

अथ शर्मिष्ठासुतं पूरुं तथैवाह । स चातिप्रवणमतिः पितरं प्रणम्य सबहुमानं महान्प्रसादोऽयमस्माकमित्यभिधाय तस्य जरां गृहीत्वा तस्मै यौवनं ददौ । ययातिस्तु यौवनमभिनवमासाद्य धर्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं सर्वान् विषयान्बुभुजे । परं न तृप्तिमवाप । अनुदिनं तस्य विषयतृष्णा ववृधे । ययातिरुवाच ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १ ॥
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यतः ॥ २ ॥

विष्णुपुराणम् ।

अभ्यासः—१ शुक्राचार्य या अर्थाचे पाठांतील शब्द सांगा.
२ समास—सबहुमानम् । त्वत्प्रसूतिः । यथाकामम् ।

---

१६ भोजनसमारम्भः ।

परिचयः—मनोरमामाधव या नांवाचा ग्रंथ वासुदेवशास्त्री ताटके या पंडितानीं लिहिला आहे. या ग्रंथाची रचना दशकुमारचरित, कादंबरी या पुस्तकांच्या वळणावर आहे. प्रस्तुत उतान्यांत भोजनसमारंभाचें सुंदर वर्णन आहे.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मिन्नेवावसरे भोजनपङ्क्तिरचनाकौशलविशारदो भोजनशालाध्यक्षः ससंभ्रममुपसृत्य चन्द्रापीडं प्रणम्य कृताञ्जलिपुटः सविनयमब्रवीत् । देव चित्रविचित्ररङ्गावलिस्वस्तिककनकपीठसंयुतानि भोजनपात्राणि संपन्नानि । तदागच्छतु देवो भोजनाय सकलराजन्यगणेन वधूवरयुग्मैश्च सहेति । आवेदिते च तस्मिन्सदाचारतत्परश्चन्द्रापीडोऽस्ताचलशिखरचूडामणिं दिनकरमवलोक्य सर्वैस्सह संध्याकर्म समासादयत् । आसाद्य च सर्वैऽपि पीताम्बराणि महावस्त्राणि च परिधायेषत्पूरितकनकरत्नमयजलपात्रैः सह भोजनपङ्क्तिस्थानं प्रविश्य यथाधिकारं पीठे पीठे समुपाविशन् । उपविश्य च सुखेनैव भोक्तव्यमिति चन्द्रापीडेन सादरं प्रार्थिताः षड्रसान्नभोजिनोऽपरिमितपक्वान्नस्वादरुचिनिपुणा अगरुधूपपरिमलसंतृप्तघ्राणाः प्रज्वलितकनकादिपात्रस्थिततारागणसहस्रसंनिभदीपप्रभादर्शितकुतूहला विविधविनोदपरिहाससंभाषणरताः श्रोत्राभिरामसंगीतवाद्यध्वनिश्रवणसंतुष्टा वधूवरयुग्मानामन्योन्यनामग्रहणपूर्वकं सस्मितं सदृष्टिक्षेपं सलज्जं ग्रासप्रदानकौतुकं निरीक्षवन्तो महाकुलभूषणा राजपुरुषा यद्रोचते तद्गृहीत्वा यन्न रोचते तत् त्यक्त्वा ग्रासे ग्रासे पदार्थकर्मकौशलं वर्णयन्तो भोजनं चक्रुः । भोजनानन्तरं पुनः सभामण्डपे गृहीतैलाकर्पूरादिसुगन्धद्रव्यसंयुतताम्बूलकुसुमगुच्छहारवसनभूषणाः सर्वेऽपि वधूवराणां वीटिकासंछेदनकुतूहलं विलोक्य गन्धर्वनगरागतवारविलासिनीनृत्यगीतश्रवणतत्परा बभूवुः । तस्मिन्नेवावसरे विहितादरकर्मनिपुणा सुशीला देवी कादम्बरी समहाश्वेता सुमित्रादिभिः प्रमदाजनैः सह वरजननीं कीर्तिमालिनीमग्रपीठे समुपवेश्य प्रचुरविनोदभाषणानुरक्ता वधूवरयुग्मान्विता भोजनकर्म समासादयत् ।

मनोरमामाधवम् ।

अभ्यासः—१ पीठे पीठे, ग्रासे ग्रासे असे दोनदां कां आले ?

२ मराठींत सुंदर भाषांतर करा.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१७ यौवनप्रभावः ।

परिचयः—संस्कृत भाषेमध्यें बाणकवीचा कादंबरी हा ग्रंथ फार प्रसिद्ध आहे. त्यांतील कल्पनेच्या भराऱ्या मनोरम आहेत. वाचक लांबच लांब असलेल्या ओळी पाहून भितो; परंतु तसें भिण्याचें कारण नाहीं. संस्कृतभाषा कठीण आहे अशी कल्पना विद्यार्थ्यांनीं प्रथम करून घेऊं नये. सहज कळण्याइतकी ती सोपी आहे हें पुढील तारुण्यमदाच्या वर्णनावरून दिसून येईल.

किमस्ति कश्चिदसावियति लोके यस्य निर्विकारं यौवनमतिक्रान्तम् । यौवनावतारे हि शैशवेन सह गलति गुरुजनस्नेहः । वयसैव सहारोहत्यभिनवा प्रीतिः । वक्षसैव सह विस्तीर्यते वाञ्छा । बलेनैव सहोपचीयते मदः । दोर्द्वयेनैव सह स्थूलतामापद्यते धीः । मध्येनैव सह कार्श्यमुपयाति श्रुतम् । उरुयुगलेनैव सहापचीयते विनयः । श्मश्रुभिरेव सहोज्जृम्भते मलिनताहेतुर्मोहः । आकारेणैव सहाविर्भवन्ति हृदयाद्विकाराः । तद्यथा, धवलमपि सर्वथा सरागं चक्षुर्दीर्घं न पश्यति । अनुपहतेऽपि श्रोत्रे न प्रविशति गुरूपदेशः । स्त्रीरागिण्यपि न विद्यान्तरं हृदये विन्दति । स्थैर्यमस्थिरप्रकृतेः तरलतायाम् । परित्याज्येषु विषयेष्वासङ्गः । विकाराणां च कारणं प्रायः सरसता । सा च सर्वमेव जलप्रायं कुर्वाणा वर्षातिवृद्ध्यैवोपजायते । अपि च दिवसो दोषागमाय, दोषागमोऽनालोकाय, अनालोकोऽसद्दर्शनार्थं, असद्दर्शनमविवेकाय, अविवेकोऽसन्मार्गप्रवृत्तये । असन्मार्गप्रवृत्तं च मोहान्धं चेतो भ्राम्यदवश्यमेव स्खलति । स्खलिते चेतसि तल्लज्जा पतत्येव लज्जा । त्रपावरणशून्ये च हृदि प्रविश्य पदं कुर्वन् केन वा निवारितः सर्वाविनयहेतुः कुसुमधन्वा । विलसति च पुष्पसायके छिद्रसहस्राण्याविर्भवन्ति । तेभ्यः सत्त्वमधस्तादव्रजति । सत्त्वे चाधो गते किमाश्रित्य न गलति शीलम् । किमवलम्बनं विनयस्य । किं करोत्वनाधारं धैर्यम् ।

कादम्बरी ।

अभ्यासः—१ कर्मणि वर्त० तृ. पु. ए. व. द्याः—पश्यति, करोति.
२ दोन अर्थ दर्शविणारे शब्दसमुच्चय सांगा.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१८ नन्दिनीहरणम् ।

परिचयः—विश्वामित्र राजा वनांत शिकार करून दमल्यावर वसिष्ठ ऋषीच्या आश्रमांत गेला. वसिष्ठानें त्याचा सत्कार करून त्यास उत्तम भोजन दिलें. कामधेनूच्या मुलीच्या प्रभावामुळें वसिष्ठ ऋषीस हें सर्व प्राप्त झालेलें पाहून विश्वामित्रानें तिला पळविण्याचा बेत केला; पण तो फसला हें पुढील पाठांत वांचा.

आसीत्कान्यकुब्जदेशे कुशिकस्यात्मसम्भवो लोके गाधीति विश्रुतः पार्थिवः । तस्य धर्मात्मनः पुत्रः समृद्धबलवाहनो रिपुमर्दनो विश्वामित्र इति ख्यातो बभूव । एकदा स सहामात्यो मृगयार्थं वने विचरन् मृगान्वराहांश्च जघान । व्यायाम्कृशितः पिपासार्दितः स नरश्रेष्ठो वसिष्ठस्याश्रममाजगाम । मुनिर्वसिष्ठस्तं पूजया प्रतिजग्राह । यद् यद् वसिष्टेन वाञ्छितं तत् तत् सर्वं वसिष्ठस्य कामधुक् धेनुर्दुदुहे । तस्याः प्रसादेन वसिष्ठो विश्वामित्राय महार्हाणि रत्नानि, विविधानि वासांसि, रुचिराण्यन्नानि ददौ । सामात्यो विश्वामित्रः बलेन सह भृशं तुतोष तां वसिष्ठधेनुं नन्दिनीमभिनन्द्याब्रवीत् ।

अर्बुदेन गवां ब्रह्मन् मम राज्येन वा पुनः ।
नन्दिनीं संप्रयच्छस्व भुङ्क्ष्व राज्यं महामुने ॥ १ ॥

वसिष्ठ उवाच ।

देवतातिथिपित्रर्थं याज्यार्थं च पयस्विनी ।
अदेया नन्दिनीयं वै राज्येनापि तवानघ ॥ २ ॥

विश्वामित्र उवाच ।

रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ।
क्षत्रियोऽहं भवान्विप्रस्तपःस्वाध्यायसाधनः ॥ ३ ॥
ब्राह्मणेषु कुतो वीर्यं प्रशान्तेषु धृतात्मसु ।
अर्बुदेन गवां यस्त्वं न ददासि ममेप्सितम् ॥ ४ ॥
स्वधर्मं न प्रहास्यामि नेष्यामि च बलेन गाम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वसिष्ठ उवाच ।

बलस्थश्चासि राजा च बाहुवीर्यश्च क्षत्रियः ।
यथेच्छसि तथा क्षिप्रं कुरु मा त्वं विचारय ॥ ५ ॥
एवमुक्तस्तथा पार्थ विश्वामित्रो बलादिव ।
हंसचन्द्रप्रतीकाशां नन्दिनीं तां जहार गाम् ॥ ६ ॥
सा तदा ह्रियमाणा च विश्वामित्रबलैर्बलात् ।
कशादण्डप्रणुदिता काल्यमाना इतस्ततः ॥ ७ ॥
हम्भायमाना कल्याणी वसिष्ठस्याथ नन्दिनी ।
आगम्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी ॥ ८ ॥
भृशं च ताड्यमाना वै न जगामाश्रमात्ततः ।

वसिष्ठ उवाच ।

शृणोमि ते रवं भद्रे विनन्दन्त्याः पुनः पुनः ॥ ९ ॥
ह्रियसे त्वं बलाद्भद्रे विश्वामित्रेण नन्दिनि ।
किं कर्तव्यं मया तत्र क्षमावान् ब्राह्मणो ह्यहम् ॥ १० ॥
सा भयान्नन्दिनी तेषां बलानां भरतर्षभ ।
विश्वामित्रभयोद्विग्ना वसिष्ठं समुपागमत् ॥ ११ ॥

गौरुवाच ।

कशाग्रदण्डाभिहतां क्रोशन्तीं मामनाथवत् ।
विश्वामित्रबलैर्घोरैर्भगवन् किमुपेक्षसे ॥ १२ ॥
एवं तस्यां तदा पार्थ धर्षितायां महामुनिः ।
न चुक्षुभे तदा धैर्यान्न चचाल धृतव्रतः ॥ १३ ॥

वसिष्ठ उवाच ।

क्षत्रियाणां बलं तेजो ब्राह्मणानां क्षमा बलम् ।
क्षमा मां भजते यस्माद्गम्यतां यदि रोचते ॥ १४ ॥

नन्दिन्युवाच ।

किं नु त्यक्तास्मि भगवन्यदेवं त्वं प्रभाषसे ।
अत्यक्ताहं त्वया ब्रह्मन्नेतुं शक्या न वै बलात् ॥ १५ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वसिष्ठ उवाच ।

न त्वां त्यजामि कल्याणि स्थीयतां यदि शक्यते ।
दृढेन दाम्ना बद्धैष वत्सस्ते ह्रियते बलात् ॥ १६ ॥

स्थीयतामिति वसिष्ठवचनं श्रुत्वा रौद्रदर्शना सा पयस्विनी हंभारवं कृत्वा विश्वामित्रस्य तत्सैन्यं व्यद्रावयत् । आदित्य इव मध्यान्हे क्रोधदीप्तवपुरङ्गारवर्षं मुञ्चन्तीव बभौ । सा गौः फेनतो बहुविधान्म्लेच्छान् पुलिन्दान् हूणान् विससर्ज । विसृष्टेन तेन महासैन्येन विश्वामित्रबलं महतास्त्रवर्षेणावाकीर्यत । क्रोधाविष्टो विश्वामित्रस्ततो मुनिसत्तमे वसिष्ठे शरवर्षाणि ववर्ष । स महामुनिस्तान्घोररूपान् विश्वामित्रप्रयुक्तान्नाराचान् वैणवेन व्यमोचयत् । दिव्यान्यस्त्राण्यपोह्य वसिष्ठो वाक्यमब्रवीत् ।

निर्जितोऽसि महाराज दुरात्मन् गाधिनन्दन ।
यदि तेऽस्ति परं शौर्यं तद्दर्शय मयि स्थिते ॥ १७ ॥
विश्वामित्रस्तथा चोक्तो वसिष्ठेन नराधिपः ।
नोवाच किंचिद् व्रीडाढ्यो विद्रावितमहाबलः ॥ १८ ॥
दृष्ट्वा तन्महदाश्चर्यं ब्रह्मतेजोभवं तदा ।
विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत् ॥ १९ ॥
धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ।
बलाबले विनिश्चित्य तप एव परं बलम् ॥ २० ॥
स राज्यं स्फीतमुत्सृज्य तां च दीप्तां नृपश्रियम् ।
भोगांश्च पृष्ठतः कृत्वा तपस्येव मनो दधे ॥ २१ ॥

महाभारते आदिपर्वणि ।

अभ्यासः—१ संप्रयच्छस्व असे आर्ष प्रयोग भारतांत आढळतात.
२ भू. धा. साधितें द्याः–दुह्, हन्, दा, ग्रह्.
३ आढ्य जोडून विशेषणें करा, जसें व्रीडाढ्यः ।
४ धिक् चा वाक्यांत उपयोग करा.
५ वाक्प्रचार—वसिष्ठः तं पूजया प्रतिजग्राह ।
भोगांश्च पृष्ठतः कृत्वा ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१९ सावित्रीकथा प्रथमो भागः ।

संदर्भः—सावित्री आख्यान प्रसिद्ध आहे. तीन भागांत तें या पुस्तकांत दिलें आहे.

पुरा किल मद्रेष्वश्वपतिर्नाम राजा बभूव । स धर्मात्मा शरण्यः सत्यसंधो जितेन्द्रियो यज्वा पौरजानपदप्रियः सर्वभूतहिते रतश्चासीत् । किंत्वनपत्यः । तस्मात्सोऽपत्यप्राप्त्यर्थं तीव्रं नियममास्थाय सावित्रीं देवतामाराधयामास । अथ कस्मिंश्चित् काले गते तस्य महिषी गर्भमादधे । प्राप्ते काले चैकां कन्यां सुषुवे । सा सावित्र्या प्रीतया दत्तेति पिता विप्राश्च तस्याः सावित्रीत्येव नाम चक्रुः । सा नृपात्मजा विग्रहवती श्रीरिव वर्धमाना गच्छता कालेन प्राप्तयौवना बभूव । तेजसा ज्वलन्तीं तां दृष्ट्वा सर्वे जना देवकन्येयं प्राप्तेति मेनिरे । तस्यास्तेजसा प्रतिवारितः न कोऽपि तां वरयामास । तां यौवनस्थामपि नृपतिभिरयाच्यमानां दृष्ट्वा परमदुःखितः पिता तामुवाच । वत्से अयं ते प्रदानकालः । परं न कश्चित् त्वां वृणोति । तस्माद्गुणैरात्मनः सदृशं भर्तारमन्विच्छेति । तथेत्युक्त्वा सा पितृवचनानुरोधतो हैमं रथमास्थाय सचिवैः सह राजर्षीणां तपोवनानि सर्वाणि तीर्थानि निखिलानाश्रमांश्चाभिगम्य पितृसदनं निवृते ।

अथ तस्मिन्समये सभामध्ये स राजा भगवता नारदेन सहालापं कुर्वन्नुपविष्ट आसीत् । तां तथायान्तीं दृष्ट्वा नारदोऽश्वपतिं पप्रच्छ । इयं कुत्र गताऽभूत् । किमर्थं त्वमिमां भर्त्रे नाद्यापि प्रयच्छसीति । अश्वपतिरब्रवीत् । अनेनैव कार्येण प्रेषितेयमद्यैवागता । यो भर्तानया वृतस्तं श्रोतुं भगवानर्हति । इत्युक्त्वा विस्तरेण ब्रूहीति कन्यामादिदेश । एवमादिष्टा सा प्रत्युवाच । आसीच्छाल्वेषु द्युमत्सेनो नाम पृथिवीपतिः । स कालेनान्धो बभूव । विनष्टचक्षुषस्तस्य बालपुत्रस्य राज्यं पूर्ववैरिभिः समाहृतम् । ततोऽसौ सहारण्यं गत्वा तपस्तेपे । तस्य राज्ञः पुत्रस्तपोवने संवृद्धः सत्यवाननुरूपो मे पतिरिति मनसा मया वृत इति । नारदस्तु तद्वचः श्रुत्वा प्राह । महदापं खलु सावित्र्या कृतं यदनया गुणवानपि सत्यवान् वृतः । अश्वपतिः प्राह । भगवन् किं तत्पापम् । नारदः प्रत्युवाच । असौ सर्वगुणोपेतः । तथा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्यद्यप्रभृति संवत्सरेणायं क्षीणायुर्भूत्वा देहत्यागं करिष्यति । नारदवचनं श्रुत्वाऽश्वपतिस्तामाह । गच्छ त्वम् । अन्यं भर्तारं वरय । यतः सत्यवति महानयं दोषः । सावित्री प्राह । दीर्घायुरल्पायुर्वा सगुणो निर्गुणो वा सकृन्मया भर्ता वृतः । नाहमधुना द्वितीयं वृणोमि, सकृत् कन्या प्रदीयते इति वचनात् । तच्छ्रुत्वा नारदः प्रोवाच । अश्वपते, स्थिरबुद्धिरियं कन्या । तस्मात्सत्यवतेऽस्याः प्रदानं मे रोचते । एवमुक्त्वा नारदस्त्रिदिवं गतः ।

राजापि दुहितुः सर्वं वैवाहिकं कारयित्वा द्युमत्सेनाश्रमं कन्यया द्विजैश्च सार्धं पद्भ्यामेव जगाम । गत्वा च सावित्रीं मे कन्यकां स्नुषार्थे गृहाणेति द्युमत्सेनमुवाच । स आह । राज्यभ्रष्टा वयं वनमाश्रित्य तपस्विनो भूत्वा धर्मं चरामः । कथं नाम तवेयं सुता वनवासक्लेशं सहिष्यते । किं तु भूयो भूयोऽश्वपतिनानुरुध्यमानो द्युमत्सेनस्तस्य प्रणयमङ्गीचकार । आश्रमवासिनोऽखिलान् द्विजानाहूय तौ नृपौ यथाविधि समुद्वाहं कारयामासतुः । अश्वपतिः कन्यां यथार्हं परिच्छेदं दत्त्वा परमया मुदा स्वभवनं ययौ । सत्यवानपि तां सर्वगुणोपेतां भार्यां लब्ध्वा मुमुदे । सावित्र्यपि यथेप्सितं भर्तारं प्राप्य परं संतोषमनुबभूव । गते पितरि सा सर्वाण्याभरणानि संन्यस्य वल्कलानि गृहीत्वा शुश्रूषातत्परतया न केवलं भर्तुर्गुरूणामपि तुष्टिमावहत् ।

एवं तेषां तत्र निवसतां बहुतिथे काले व्यतीते सत्यवतो मरणकालः समीपमुपस्थितः । सावित्री नारदोक्तान् दिवसान् गणयित्वा चतुर्थेऽहनि सत्यवता मर्तव्यमिति संचिन्त्य त्रिरात्रं व्रतमुद्दिश्य नक्तंदिवं स्थिताऽभवत् । तस्या व्रताचरणनिश्चयं निशम्य द्युमत्सेनस्तस्मात्तां व्यावर्तयितुमियेष । किंतु सावित्र्युवाच । तात न संतापः कार्यः । अहं व्रतं पारयिष्यामि । एवमुक्तः श्वशुरस्तामनुजज्ञे । अथ भर्तृमरणदिवसे प्राप्ते प्रातरुत्थाय हुताशनं हुत्वा सर्वान् द्विजान् वृद्धान् श्वश्रूं श्वशुरं चाभिवाद्य सर्वेषामवैधव्याशिषः प्रत्यग्रहीत् । अनन्तरं द्युमत्सेनस्तामाह । वत्से त्वया यथोद्दिष्टं व्रतं पारितम् । अधुनाऽऽहारकालः संप्राप्तः । सावित्र्योक्तम् । अस्तं गते सवितरि भोक्तव्यमिति मे संकल्पः । एवं भाषमाणायां तस्यां सत्यवान् स्कन्धे परशुमादाय

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काष्ठान्याहर्तुं वनं प्रस्थितः । तेन निषिध्यमानापि सावित्री तमनुगन्तुकामाऽभूत् । सा श्वश्रूं श्वशुरं च विज्ञाप्य ताभ्यामनुज्ञाता भर्त्रा सह वनं प्रतस्थे ।

महाभारतम् ।

अभ्यासः—१ वाक्प्रचार—गच्छता कालेन । तपः तेपे । बहुतिथे काले व्यतीते । प्रणयं अङ्गीचकार । सत्यवति महानयं दोषः ।

२ वाक्यांत योजाः—रुच्, क्रुध्, क्लृप्.

---

२० भृत्यगुणाः ।

संदर्भः—उत्तम सेवकाच्या अंगांत कोणते गुण असतात हें कादंबरींत एका सेवकाच्या मुखानें सांगितलें आहे.

इत्येवमादिष्टो मेघनादो व्यज्ञापयत् । देवि राजलोके तु का कथा । भृत्यवर्गोऽपि सकल एवायं कन्दमूलफलाशी निश्चयं कृत्वा स्थितः । यथास्माकं मध्यादेकेनापि देवपादान्विना न प्रतीपं गन्तव्यमिति । भृत्या अपि त एव ये सम्पत्तेर्विपत्तौ सविशेषं सेवन्ते । समुन्नम्यमानाः सुतरामवनमन्ति । आलप्यमाना न समानालापाः संजायन्ते । स्तूयमाना नोत्सिच्यन्ते । क्षिप्यमाणा नापराधं गृह्णन्ति । उच्यमाना न प्रतीपं भाषन्ते । पृष्टा हितं प्रियं च विज्ञापयन्ति । अनादिष्टाः कुर्वन्ति । कृत्वा न जल्पन्ति । पराक्रम्य न विकत्थन्ते । विकत्थ्यमाना अपि लज्जामुद्वहन्ति । महाहवेष्वग्रतो ध्वजभूता इव लक्ष्यन्ते । दानकाले पलायमानाः पृष्ठतो निलीयन्ते । धनात्स्नेहं बहु मन्यन्ते । जीवितात्पुरो मरणमभिवाञ्छन्ति । गृहादपि स्वामिपादमूले सुखं तिष्ठन्ति । येषां च तृष्णा चरणपरिचर्यायामसंतोषो हृदयाराधने, व्यसनमाननावलोकने, वाचालता गुणग्रहणे, कार्पण्यमपरित्यागे भर्तुः । ये च विद्यमानेऽपि स्वात्मन्यस्वाधीनसकलेन्द्रियवृत्तयः पश्यन्तोऽप्यन्धा इव, शृण्वन्तोऽपि बधिरा इव, वाग्मिनोऽपि मूका इव, जानन्तोऽपि जडा इवानुपहतकरचरणा अपि पङ्गव इवाकिञ्चित्कराः स्वात्मना स्वामिचित्तादर्शे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिबिम्बवद्वर्तन्ते । तत्सर्वं एवायमेवं स्थितो भृत्यलोकः । देवस्य स्थाने च देवी वर्तते । तदाज्ञापयतु देवी ।

कादम्बरी ।

अभ्यासः—१ प्रयोग बदलाः—अनादिष्टाः कुर्वन्ति । स्वामिपादमूले तिष्ठन्ति ।

२ परोक्षभूताचें तृ. पु. ए. व. द्याः—सेव्, मन्, ज्ञा.

---

२१ महाश्वेताजन्म ।

संदर्भः—अच्छोद सरोवराच्या काठीं शंकराच्या देवालयांत चंद्रापीडानें महाश्वेतेस पाहिली व तिला तिचा वृत्तान्त विचारला.

सा कन्यकापि चन्द्रापीडप्रश्नानुरोधादविच्छिन्नाश्रुजलधारापि लोचने प्रक्षाल्य वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णं च निश्वस्य शनैः प्रत्यवादीत् । राजपुत्र, किमनेन मम मन्दभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन । तथापि यदि महत्कुतूहलं तत्कथयामि । श्रूयताम् ।

एतत्प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्ति । तासां चतुर्दशकुलानि । एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम् । अन्यद्वेदेभ्यः सम्भूतम् । अन्यदग्नेरुद्भूतम् । अन्यत् पवनात्प्रसूतम् । अन्यदमृतान्मथ्यमानादुत्थितम् । अन्यज्जलाज्जातम् । अन्यदर्ककिरणेभ्यो निर्गतम् । अन्यत्सोमरश्मिभ्यो निष्पतितम् । अन्यद्भूमेरुद्भूतम् । अन्यत्सौदामिनीभ्यः प्रवृत्तम् । अन्यन्मृत्युना निर्मितम् । अपरं मकरकेतुना समुत्पादितम् । अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते मुनिररिष्टा च बभूवतुस्ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् । एवमेतान्येकत्र चतुर्दशकुलानि । तत्र मुनेस्तनयश्चित्रसेनादीनां पञ्चदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः । स च सर्वेषां गंधर्वाणामाधिपत्यं त्रिभुवनविख्यातपराक्रमेण बाहुना समुपार्जितं शैशव एवासादितवान् । इतश्च नातिदूरे तस्यास्माद्भारतवर्षादुत्तरेणानन्तरे किंपुरुषनाम्नि वर्षे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वर्षपर्वतो हेमकूटो नाम निवासः । तत्र च तद्भुजयुगपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति । तनैवेदं चैत्ररथं नामातिमनोहरं काननं निर्मितम् । इदं चाच्छोदाभिधानमतिमहत्सरः खानितम् । अयं च भवानीपतिरुपरचितः ।

अरिष्टायास्तु पुत्रो हंसो नाम जगद्विदितो गन्धर्वस्तस्मिन्द्वितीये गन्धर्वकुले चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान् । तस्यापि स एव गिरिरधिवासः । यत्तु तत्सोममयूखसम्भवमप्सरसां कुलं तस्माद्रजनिकरलावण्येनेव निर्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीतिनाम्ना कन्यका प्रसूता । तां हंसः प्रणयिनीमकरोत् । हंसेन संयोजिता सा गौरी महतीं मुदमुपगतवती निखिलान्तःपुरस्वामिनी च तस्याभवत् ।

तयोश्च तादृशयोर्महात्मनोरहर्मादृशी विगतलक्षणा केवलं शोकायानेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना । तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मज्जन्माभिनन्दितवान् । अवासे च दशमेऽहनि महाश्वेतेति यथार्थमेव नाम कृतवान् । साहं पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गंधर्वाणामङ्कादङ्कं संचरन्त्यविदितस्नेहशोकायासं मनोहरं शैशवमतीतवती ।

कादम्बरी ।

अभ्यासः—१ चौदा कुलांची उत्पत्ति कशी झाली हें सांगतांना उपयोगांत आणलेलीं भू. का. वाचक धातुसाधितें सांगा.

---

२२ सावित्रीकथा । (द्वितीयो भागः)

संदर्भः—मागील भागांत सावित्री सत्यवानाबरोबर वनांत गेली. तेथें सत्यवान् मृत झाल्यावर यमाचा व सावित्रीचा संवाद झाला आणि तिनें यमापासून पांच वर मिळविले.

तौ दम्पती विचित्राणि वनानि पुण्यवहा नदीः पुष्पितांश्च नगोत्तमान् दृष्ट्वा परां मुदमवापतुः । अथ सत्यवान् फलान्यादाय काष्ठानि पाटयामास । तच्छ्रमेणास्य शिरसि वेदना जज्ञे । अतः स प्रियामभिगम्योवाच । अस्वस्थ-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मिवात्मानं लक्षये । तत्त्वमुमिच्छामि । न मे स्थातुं शक्तिरिति । पतिवाक्य-परायणा सा स्वोत्सङ्गे तस्य शिरः कृत्वा भूतले निषसाद । अथ सा मुहूर्ता-देव रक्तवाससं बद्धमौलिं श्यामावदातं रक्ताक्षं पाशहस्तं भयावहं पुरुषं सत्यवतः पार्श्वस्थितमपश्यत् । तं तथाविधमवलोक्य सावित्री प्राह । दैवतं त्वामभिज्ञानामि । वपुरेतदमानुषम् । कस्त्वम् । किं चिकीर्षसीति मां ब्रूहि । अहं यमः क्षीणायुषः सत्यवतः प्राणानपहर्तुकामश्चेत्याख्याय यमस्तस्य देहा-त्पाशबद्धं वशंगतमङ्गुष्टमात्रं पुरुषं बलान्निश्चकर्ष दक्षिणाभिमुखश्च प्रतस्थे । सावित्र्यपि दुःखार्ता तमेवानुगन्तुमारेभे । तामवलोक्य यमः प्राह । निवर्तस्व सावित्री, कुरुष्वास्यौर्ध्वदेहिकं, कृतं भर्तुस्त्वयाऽनृण्यं, यावद्भर्म्यं गतं त्वयेति । सावित्र्युवाच ।

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति ।
मयापि तत्र गन्तव्यमेष धर्मः सनातनः ॥ १ ॥
प्राहुः साप्तपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः ।
मित्रतां च पुरस्कृत्य किंचिद् वक्ष्यामि तच्छृणु ॥ २ ॥
नानात्मवन्तो हि वने चरन्ति
धर्मं च वासं च परिश्रमं च ।
विज्ञानतो धर्ममुदाहरन्ति
तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ ३ ॥

यम उवाच ।

निवर्त तुष्टोऽस्मि तवानया गिरा
स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं
ददानि ते सर्वमनिन्दिते वरम् ॥ ४ ॥

सावित्र्युवाच ।

च्युतः स्वराज्याद्वनवासमाश्रितो
विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान्भवेन्नृप-
स्तव प्रसादाज्ज्वलनार्कसंनिभः ॥ ५ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यम उवाच ।

ददानि ते सर्वमनिन्दिते वरं
यथा त्वयोक्तं भविता च तत्तथा ।
तवाध्वनि ग्लानिमिवोपलक्षये
निवर्त गच्छस्व न ते श्रमो भवेत् ॥ ६ ॥

सावित्र्युवाच ।

कुतः श्रमो भर्तृसमीपतो हि मे
यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः
सुरेश भूयश्च वचो निबोध मे ॥ ७ ॥
सतां सकृत्संगतमीप्सितं परं
ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण सङ्गतं
ततः सतां संनिवसेत्समागमे ॥ ८ ॥

यम उवाच ।

मनोनुकूलं वुधवुद्धिवर्धनं
त्वयेदमुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं द्वितीयं वरयस्व भामिनी ॥ ९ ॥

सावित्र्युवाच ।

हृतं पुरा मे श्वशुरस्य धीमतः
स्वमेव राज्यं लभतां स पार्थिवः ।
न च स्वधर्मं प्रजहातु मे गुरु-
र्द्वितीयमेतद्वरयामि ते वरम् ॥ १० ॥

यम उवाच ।

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरा-
न्न च स्वधर्मात्परिहास्यते नृपः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृतेन कामेन मया नृपात्मजे
निवर्त गच्छस्व न ते श्रमो भवेत् ॥ ११ ॥

सावित्र्युवाच ।

प्रजास्त्वयैता नियमेन संयता
नियम्य चैता नयसे निकामया ।
अतो यमत्वं तव देव विश्रुतं
निबोध चेमां गिरमीरितां मया ॥ १२ ॥
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ १३ ॥

यम उवाच ।

पिपासितस्येव भवेद्यथा पय-
स्तथा त्वया वाक्यमिदं समीरितम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं वृणीष्वेह शुभे यदीच्छसि ॥ १४ ॥

सावित्र्युवाच ।

ममानपत्यः पृथिवीपतिः पिता
भवेत् पितुः पुत्रशतं तथौरसम् ।
कुलस्य संतानकरं च यद्भवे-
त्तृतीयमेतं वरयामि ते वरम् ॥ १५ ॥

यम उवाच ।

कुलस्य संतानकरं सुवर्चसं
शतं सुतानां पितुरस्तु ते शुभे ।
कृतेन कामेन नराधिपात्मजे
निवर्त दूरं हि पथस्त्वमागता ॥ १६ ॥

सावित्र्युवाच ।

न दूरमेतन्मम भर्तृसन्निधौ
मनो हि मे दूरतरं प्रधावति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ व्रजन्नेव गिरं समुद्यतां
मयोच्यमानां शृणु भूय एव च ॥ १७ ॥
विवस्वतस्त्वं तनयः प्रतापवां-
स्ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्मेण च रञ्जिताः प्रजा-
स्ततस्त्वमेहेश्वर धर्मराजता ॥ १८ ॥
आत्मन्यपि न विश्वासस्तावान्भवति सत्सु यः ।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥ १९ ॥

यम उवाच ।

उदाहृतं ते वचनं यदङ्गने
शुभे न तादृक् त्वदृते मया श्रुतम् ।
अनेन तुष्टोऽस्मि विनास्य जीवितं
वरं चतुर्थं वरयस्व गच्छ च ॥ २० ॥

सावित्र्युवाच ।

ममात्मजं सत्यवतस्तथौरसं
भवेदुभाभ्यामिह यः कुलोद्वहम् ।
शतं सुतानां बलवीर्यशालिना-
मिमं चतुर्थं वरयामि ते वरम् ॥ २१ ॥

यम उवाच ।

शतं सुतानां बलवीर्यशालिनां
भविष्यति प्रीतिकरं तवाबले ।
परिश्रमस्ते न भवेन्नृपात्मजे
निवर्त दूरं हि पथस्त्वमागता ॥ २२ ॥

सावित्र्युवाच ।

सतां सदा शाश्वतधर्मवृत्तिः
सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सद्भिर्नाफलः संगमोऽस्ति
सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥ २३ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम् ।
सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् ॥ २४ ॥

यम उवाच ।

यथा यथा भाषसि धर्मसंमतं
मनोनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा
वरं वृणीष्वाप्रतिमं पतिव्रते ॥ २५ ॥

सावित्र्युवाच ।

न कामये भर्तृविनाकृता सुखं
न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता श्रियं
न भर्तृहीना व्यवसामि जीवितुम् ॥ २६ ॥
वरातिसर्गः शतपुत्रता मम
त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे जीवतु सत्यवानयं
तवैव सत्यं वचनं भविष्यति ॥ २७ ॥

यमस्तथेत्युक्त्वा पाशं मुक्त्वा सावित्रीमाह । हे कुलनन्दिनि, एष ते भर्ता मया मुक्तः । स त्वया सह चतुर्वर्षशतायुः स्थास्यति । इत्युक्त्वासौ स्वर्लोकं ययौ ।

महाभारतम् ।

अभ्यासः—१ वाक्प्रचारः—शिरसि वेदना जज्ञे । उत्सङ्गे तस्य शिरः कृत्वा । साप्तपदं मैत्रम् ।
२ समास सोडवा—अनपत्यः । अपहर्तुकामः । औरसः ।
३ ओळखाः—चिकीर्षसि । पिपासितस्य ।
४ आर्षप्रयोगः—निवर्त, गच्छस्व, भाषसि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२३ सर्वशक्तिमान् परमेश्वरः ।

अस्य जगतः सचराचरस्यादिकर्ता सर्वसाक्षी सच्चिदानन्दस्वरूपः परमात्मा । तस्मात्संजातमिदमखिलं जगत् । स परमात्मा षड्गुणैश्वर्यसंपन्नः षड्विकाररहितो नामरूपगुणातीतः सन्नखिलं स्थावरजङ्गमात्मकं जगद्व्याप्य तिष्ठति । अस्य शक्तिर्महीयसी । अस्येच्छया विना पञ्चमहाभूतकार्याणि न प्रभवन्ति । स एव सर्वकार्याणां कर्ता कारयिता च । स एवान्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयश्च । स एव सर्गस्थितिलयकर्ता । तस्यैवेच्छया मेघो वारि सिञ्चति, वायुर्वहति, नद्यः प्रवहन्ति, प्राणिनो जीवन्ति, सूर्यस्तपति, वृक्षाः प्ररोहन्त्यग्निर्ज्वलति, तृणधान्यानि चोद्भवन्ति । तस्येच्छया विना न कोऽपि किमपि कर्तुं समर्थः । अत एवास्य जगतः स एव वस्तुतो राजा च माता च पिता च सखा च बन्धुश्चाप्तगणश्च । स एव सकल-सौभाग्यसम्पत्सुखावाप्तिस्थानम् । अत एव स सर्वैः पूजनीयो वन्दनीयश्च । तस्यैव कृपापेक्षणीया । स एव दुःखप्रशमनाय संप्रार्थनीयः । यद्यन्नरः करोति यदश्नाति यज्जुहोति यद्ददाति यत्तपति यच्च गृह्णाति तत्तत्सर्वं तदर्पणं करणीयम् । तस्यैव प्रसादो गृह्यताम् । सर्वकार्यारम्भसमये प्रथमं तमेवाभि-वाद्य करणीयं कार्यं प्रारभेत । अनन्तान्यस्य नामरूपाणि । यद्यस्मै रोचते तदेव तेनानन्यभावेन नवविधया भक्त्यार्चनीयम् । निष्ठाबलेन तदेव तस्य सकलमनोरथप्राप्तिस्थानं सकलसौख्यफलप्रदं सकलकल्याणकरं च भवेत् ।

मनोरमामाधवम् ।

अभ्यास—१ प्रयोग बदला:—प्रसादः गृह्यताम् । मेघो वारि सिञ्चति ।
२ धातु वं गण सांगा—जुहोति, ददाति, अश्नाति, गृह्णाति ।

सावित्रीकथा । (तृतीयो भागः)

संदर्भः—या भागांत सावित्री आख्यानाचा उपसंहार केला आहे.

स्वर्लोकं गते यमे सावित्री यावत्सत्यवन्तमभिगम्यावलोकयति तावत्स लब्धसंज्ञो भूत्वा प्रोष्येवागतोऽहं क्वासौ श्यामः पुरुषो गतस्तवोत्संगे प्रसुप्तोऽहं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घोरं तमो महौजसं पुरुषमपश्यम् किमयं स्वप्न उत सत्यमिति सोत्कण्ठं पप्रच्छ । सावित्री प्रत्युवाच । अधुना रजनी व्यवगाहते । श्वस्ते सर्वमाख्यास्यामि । संप्रति निवृत्तो दिवाकरो नक्तंचराश्च क्रूराभिभाषिणश्चरन्ति । तद्यदि तेऽभिरोचते तत इमां क्षपामत्रैवोषित्वा श्वो गृहं यास्याव इति । सत्यवानाह । दिवापि मयि निष्क्रान्ते मम गुरू संतप्येते । मदर्थं तयोरद्य कावस्थेति न जाने । मांता वृद्धा पिताप्यन्धस्तयोरहं यष्टिः किल । अतः पित्रोः सकाशं गमनमेव वरमिति सावित्रीमुक्त्वा त्वरायुक्तस्या पतिव्रतया सहाश्रमं प्रायात् । एतस्मिन्नेव काले द्युमत्सेनो लब्धचक्षुः प्रसन्नया दृष्ट्या सर्वं ददर्श । पुत्रमनागतं विलोक्य पितरौ दुःखाभिभूतौ नदीः सरांसि वनानि च विचिन्वतौ परं परिश्रमं जग्मतुः । सुतस्य बाल्यवृत्तानि तानि तानि स्मृत्वा शोककर्षितौ कथमप्याश्रमवासिभिरृषिभिः परिसांत्वितौ । तस्मिन्नेव क्षणे भर्त्रा सह सावित्र्याश्रमं प्रविवेश । तावुभौ कुशलौ दृष्ट्वा सर्वे ते परां मुदमवापुः । द्युमत्सेनं लब्धचक्षुषं दृष्ट्वा मुनयः सावित्रीमस्य कारणं त्वं खलु विजानासि, यदि न रहस्यं तर्हि निवेद्यतामित्यूचुः । सा प्रत्युवाच । पूर्वं नारदमहर्षिणा कथितो मम पत्युर्मृत्युरद्यागत इति चिन्तयित्वा तेनैव सहाहं वनमगच्छम् । तत्र च परिश्रमात्सुप्तमिमं यमो दक्षिणामाशां निनाय । अहं तु तमेवानुसरन्ती स्तुतिभिस्तं समाराध्य प्रासादयम् । ततस्तुष्टेन तेन मह्यं पञ्च वराः प्रदत्ताः । तेषामेकतमेन मे श्वशुरो लब्धचक्षुर्जातः स्वराज्यमप्यचिरात्प्राप्स्यत्येव । इत्युक्त्वान्येषामपि चतुर्णां वराणां स्वरूपं कथयित्वा विरराम । तन्निशम्य मुनय ऊचुः । साध्वि, व्यसनैरभिद्रुतं तमोमये हृदे निमज्जमानं राजकुलं सुशीलव्रतपुण्यया कुलीनया त्वयाद्य समुद्धृतम् । इति तामभिनन्द्य सर्वे ते महर्षयो मुदिताः स्वस्थानं जग्मुः । प्रभातायां रजन्यां शाल्वेभ्यः प्रकृतय आगत्य द्युमत्सेनमाहुः राजन् संप्राप्तानि यानानि चतुरङ्गं च बलम् । अधुनैव नगरं यास्यामो येन भवान्राज्येऽभिषिच्येतेति । द्युमत्सेनोऽपि राज्ञ्या सावित्र्या सुतेन चानुगतो नगरं प्राप्य सिंहासनमारूढः । सत्यवानपि यौवराज्येऽभिषिक्तः । गच्छता कालेन सावित्री पुत्रशतं सुषुवे । एवं मातापितरौ श्वश्रूश्वशुरौ भर्तुः सकलमेव कुलं सावित्र्या संकटात्समुद्धृतम् ।

महाभारतम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः—१ वाक्प्रचार—परां मुदं अवापुः । प्रभातायां रजन्याम् ।
२ कर्मणि रूपें द्याः—निनाय, सुषुवे, पप्रच्छ, प्रत्युवाच ।

---

२५ रत्नावलीप्रस्तावना ।

परिचयः—रत्नावली नाटक भासकवीनें रचिलें आहे. भास हा प्रतिभावान् कवी आहे. प्रियदर्शिका वगैरे बरीच नाटकें त्यानें लिहिलीं आहेत.

सूत्रधारः—अलमतिप्रसङ्गेन । अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशादागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः । यथास्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृता रत्नावली नाम नाटिका कृता । सा चास्माभिः श्रुता । न तु प्रयोगतो दृष्टा । तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्येति । (परिक्रम्यावलोक्य च) तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । (परिषदमवलोक्य) आवर्जितानीव सकलसामाजिकानां मनांसीति मे निश्चयः । यतः ।

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ १ ॥

तद्यावद्गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य च) इदमस्मदीयं गृहम् । यावत्प्रविशामि । (प्रविश्य) आर्ये इतस्तावत् ।

(प्रविश्य)

नटीः—आर्यपुत्र इयमस्मि । आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति ।

सूत्रधारः—आर्ये रत्नावलीदर्शनोत्सुकोऽयं राजलोकः । तद्गृह्यतां नेपथ्यम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नटी:—(निःश्वस्य सोद्वेगम्) आर्यपुत्र, निश्चिन्त इदानीमसि त्वम्। तत्कस्मान्न नृत्यसि । मम पुनर्मन्दभाग्याया एकैव दुहिता । सापि त्वया कुत्रापि देशान्तरे दत्ता । तदेवं दूरदेशस्थितेन भर्त्रा सह कथं तस्याः पाणिग्रहणं भविष्यतीत्यनया चिन्तयाऽऽत्मापि मे न प्रतिभाति । तत्किं-पुनर्नर्तितव्यम् ।

सूत्रधारः – आर्ये, दूरस्थेनेत्यलमुद्वेगेन । पश्य ।

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥ २ ॥

(नेपथ्ये ।) साधु भरतपुत्र, साधु, एवमेतत् । कः सन्देहः । (इति पुनः पठति द्वीपादन्यस्मादिति)

सूत्रधारः—(आकर्ण्य नेपथ्याभिमुखमवलोक्य) आर्ये, किमतःपरं विलम्बसे । नन्वयं मम यवीयान्भ्राता गृहीतयौगन्धरायणभूमिकः प्राप्त एव । तदेहि वयमपि सज्जीभवामः ।

रत्नावली +

अभ्यासः—१ समास सोडवाः—दर्शनोत्सुकः जनः । अपूर्ववस्तु-रचनालङ्कृता । २ अभिमुखीभूतः च्विचें रूप. उदा० घनीभूतः जें जसें नाहीं तें तसें करणें ही च्वि प्रत्ययाची शक्ति आहे. ३ अलम् याचा उपयोगः—अलमति-प्रसङ्गेन । कृष्णः चाणूराय अलम् । ४ वाक्प्रचारः—आत्मापि मे न प्रतिभाति ।

---

२६ राजवाहनजन्म ।

परिचय:—दण्डीकवीनें दशकुमारचरित्र हा ग्रंथ लिहिला. यांत दहा कुमारांच्या मनोरंजक गोष्टी आहेत. राजवाहनाची जन्मकथा या पाठांत आहे.

ततः सकलसैन्यसमन्वितो राजहंसरूपोविश्राजमानं वामदेवनामानं तपोधनं निजाभिलाषावासिसाधनं जगाम । तं प्रणम्य तेन कृतातिथ्यस्तस्मै कथितकथ्यस्तदाश्रमे दूरीकृतश्रमे कंचन कालमुषित्वा निजराज्याभिलाषी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मितभाषी सोमकुलावंतसो राजहंसो मुनिमभाषत । भगवन् मानसारः प्रबलेन दैवबलेन मां निर्जित्य मद्भोग्यं राज्यमनुभवति । तद्वदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन भवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्तवम् इति । ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत् । सखे शरीरकार्श्यकारिणा तपसाऽलम् । वसुमतीगर्भस्थः सकलरिपुकुलमर्द्रनो राजनन्दनो नूनं सम्भविष्यति । कंचन कालं तूष्णीमास्स्व इति । गगनचारिण्या वाण्यापि सत्यमेतत् इति तदैवावोचि । राजापि मुनिवाक्यमङ्गीकृत्यातिष्ठत् ।

ततः सम्पूर्णगर्भदिवसा वसुमती सुमुहूर्ते सकललक्षणलक्षितं सुतमसूत । ब्रह्मवर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालङ्कारेण च विराजमानं राजवाहननामानं व्यधत्त । तस्मिन्नेव काले सुमतिसुमंत्रसुमित्रसुश्रुतानां मंत्रिणां प्रमतिमित्रगुप्तमंत्रगुप्तविश्रुताख्याः सूनवो नवोद्यदिन्दुरुचश्चिरायुषः समजायन्त । राजवाहनो मंत्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्धत ।

दशकुमारचरितम् ।

अभ्यासः—१ समासः—तपोधनः । सोमकुलावतंसाः । विश्रुताख्यः ।
२ अङ्गीकृत्य—च्विरूप.

---

२८ सोमदत्तकथा ।

संदर्भः—दहा कुमारांपैकीं सोमदत्ताच्या जन्माची हकीकत.

ततः परस्मिन्दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्तिं निर्भत्सितमारमूर्तिं कुसुमसुकुमारं कुमारमेकवरगमय्य नरपतिमवादीत् । 'देव, तीर्थयात्राप्रसङ्गेन कावेरीतीरमागतोऽहं विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदतीं स्थविरामेकां विलोक्यावोचम् । स्थविरे, का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किमिति । सा करयुगेन बाष्पजलमुन्मृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत् । ' द्विजात्मज, राजहंसमन्त्रिणः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सितवर्मणः कनीयानात्मजः सत्यवर्मा तीर्थयात्राभिलाषेण देशमेनमागच्छत् । स कस्मिंश्चिदग्रहारे कालीं नाम कस्यचिद्भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत । काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामक्षिपत् । करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशि । मदवलम्बीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत् । गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते ' इति । ततो विषमविषज्वालावलीढावयवा सा धरणितले न्यपतत् । दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यथामपनेतुमक्षमः समीपकुक्षेष्वौषधिविशेषमन्विष्य प्रत्यागतोव्युत्क्रान्तजीवितां तां व्यलोकयम् । तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बालमेनमगतिमादाय सत्यवर्मवृत्तान्तश्रवणवेलायां तन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयमिति । तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयं समर्पितवान् । सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष ।

दशकुमारचरितम् ।

अभ्यासः—१ समास—सोदरः । दयाविष्टहृदयः । सासूयम् ।
२ या पाठांतील तृतीय भूतार्ची रूपें सांगा.

---

२८ शाकुन्तलप्रस्तावना ।

परिचयः—शाकुन्तल हें कालिदासाचें उत्कृष्ट नाटक. काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला । हा श्लोक प्रसिद्ध आहे. प्रथितयश कवीदेखील आपल्या उत्तम ग्रंथाबद्दल लोकांचें मत काय होईल याबद्दल साशंक असतो हें या प्रस्तावनेवरून कळून येईल.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) आर्ये, यदि नेपथ्यविधानमवसितमितस्तावदागम्यताम् ।

(प्रविश्य)

नटीः—आर्यपुत्र, इयमस्मि ।

सूत्रधारः—आर्ये, अभिरूपभूयिष्ठा परिषदियम् । अद्य खलु कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुन्तलाख्येन नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः ।

नटीः—सुविहितप्रयोगतयाऽऽर्यस्य न किमपि परिहीयते ।

सूत्रधारः—आर्ये, कथयामि ते भूतार्थम् ।

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ १ ॥

नटीः—आर्य, एवमेतत् । अनन्तरकरणीयमार्य आज्ञापयतु ।

सूत्रधारः—किमन्यदस्याः परिषदः श्रुतिप्रसादनतः । तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् । संप्रति हि

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥ २ ॥

नटीः—तथा । (इति गायति)

ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥ ३ ॥

सूत्रधारः—आर्ये, साधु गीतम् । अहो रागबद्धचित्तवृत्तिरालिखित इव सर्वतो रङ्गः । तदिदानीं कतमत्प्रकरणमाश्रित्यैनमाराधयामः ।

नटीः—नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशकुन्तलं नामापूर्वं नाटकं प्रयोगे अधिक्रियतामिति ।

सूत्रधारः—आर्ये, सम्यगनुबोधितोऽस्मि । अस्मिन्क्षणे विस्मृतं खलु मया तत् । कुतः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तवास्मि गीतरागेण हारिणा प्रसभं मनः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ ४ ॥

(इति निष्क्रान्तौ)

शाकुन्तलम् ।

अभ्यासः—१ आ याचा संबंध ज्या शब्दाकडे जातो त्या शब्दाची पंचमी योजितात. उदा० आ पारितोषात् विदुषाम् ! आ मुक्तेः संसारः ।

२ नाटकांत वापरले जाणारे शब्द ध्यानांत ठेवावे. उदा० आर्यपुत्र, आर्ये, नान्द्यन्ते, नेपथ्ये इत्यादि.

३ वाक्प्रचारः—नाटकं प्रयोगे अधिक्रियताम् । प्रतिपात्रं आधीयतां यत्नः ।

---

२९ निर्विण्णो विदूषकः ।

संदर्भः—नाटकांत विदूषक हें एक विनोदी पात्र असतें. दुष्यन्त राजा मृगया करीत असतां विदूषकाचे कसे हाल झाले तें वर्णन या पाठांत आहे.

विदूषकः—(निःश्वस्य) भो दिष्टम् । एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि । अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यते अटवीतोऽटवी । पत्रसंकरकषायाणि कटुकानि गिरिनदीजलानि पीयन्ते । अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते । तुरगानुधावनकण्डितसन्धे रात्रावपि निकामं शयितव्यं नास्ति । ततो महत्येव प्रत्यूषे दास्याः पुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि । इयतेदानीमपि पीडा न निष्क्रामति । ततो गण्डस्योपरि पिण्डकः संवृत्तः । ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला ममाधन्यतया दर्शिता । सांप्रतं नगरगमनाय मनः कथमपि न करोति । अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः प्रभातमासीत् । का गतिः । यावत्तं कृताचारपरिक्रमं पश्यामि । (इति परिक्रम्यावलोक्य च ।) एष बाणासनहस्ताभिर्यवनी-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति प्रियवयस्यः । भवतु । अङ्गभङ्गविकल इव भूत्वा स्थास्यामि । यद्येवमपि नाम विश्रमं लभेय । (इति दण्डकाष्ठमवलम्ब्य स्थितः ।) शाकुन्तलम् ।

अभ्यासः—१ पीयन्ते, भुज्यते, आहिण्ड्यते यांचीं कर्तरी रूपें द्या.

२ वाक्प्रचारः—तामेव चिन्तयतः अश्णोः प्रभातमासीत् ।

---

३० विश्वस्तेऽपि न विश्वसेत् ।

अस्ति कस्मिंश्चित्समुद्रोपकण्ठे महाजम्बूपादपः सदाफलः । तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म । तत्र च तस्य तरोरधः कदाचित् करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते निविष्टः । ततश्च रक्तमुखेन स प्रोक्तः । भो भवानभ्यागतोऽतिथिः । तद्भक्षयतु मया दत्तान्यमृतकल्पानि जम्बूफलानि । उक्तं च ।

प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः ।
वैश्वदेवान्तमासन्नः सोऽतिथिः स्वर्गसंक्रमः ॥ १ ॥

एवमुक्त्वा तस्य जम्बूफलानि प्रयच्छति । सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगात् । एवं नित्यमेव तौ वानरमकरौ जम्बूछायाश्रितौ विविधशास्त्रगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः । सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्याः प्रयच्छति । अथान्यतमे दिवसे स तया पृष्टः । नाथ, क्वैवंविधानि फलान्यमृतकल्पानि प्राप्नोति भवान् । स आह । भद्रे, ममाप्यस्ति परमसुहृद्रक्तमुखो नाम वानरः । स प्रीतिपूर्वमिमानि फलानि प्रयच्छति नित्यम् । अथ तयाभिहितम् । यः सदैवामृतप्रायाणीदृशानि फलानि भक्षयति तस्य हृदयममृतमयं भविष्यति । तद्यदि मया भार्यया ते प्रयोजनं ततस्तस्य हृदयं मम प्रयच्छ येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान्भुनज्मि । स आह । भद्रे, मा मैवं वद । यतः स प्रतिपन्नोऽस्माकं भ्राता । अपरं व्यापादयितुमपि न शक्यते । तत् त्यजैनं मिथ्याग्रहम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ मकर्याह । त्वया कदाचिदपि वचनं मम नान्यथा कृतम् । तन्नूनं सा वानरी भविष्यति । यतस्तस्यानुरागतः सकलमपि दिनं तत्र गमयसि । तत्त्वं ज्ञातः सम्यङ्मयेति । सोऽपि पत्न्याः पादोपसंग्रहं कृत्वा सुदीनमुवाच । मह्यं मा कुप्य । तव किङ्करत्वमुपागतोऽहम् । सापि तद्वचनमाकर्ण्याश्रुजलप्लुतमुखी तमुवाच । धूर्त, सैव कान्ता तव मनसि स्थिता । कृतं चरणपातविडम्बनाभिः । यदि सा तव वल्लभा न भवति तत्किं मया भणितेऽपि तं न व्यापादयसि । अथ यदि स वानरस्तत्कस्तेन सह महान्स्नेहः । तत्किं बहुना । यदि तस्य हृदयं न भक्षयामि तन्मया प्रायोपवेशनं कृतं विद्धि । एवं तस्यास्तन्निश्चयं ज्ञात्वा चिन्ताव्याकुलचित्तः स प्रोवाच । अथवा साध्विदमुच्यते ।

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा ॥ २ ॥

तत्किं करोमि । कथं स मे वध्यो भविष्यति । इति विचिन्तयन्वानरपार्श्वं समागतः । वानरोऽपि तं चिरादायान्तं सोद्वेगमवलोक्य प्रोवाच । भो मित्र, किमत्र विरलवेलायां समायातः । न सानन्दमालापयसि, न सुभाषितानि पठसि । स आह । मित्र, अहं तव भ्रातृजायया निष्ठुरतरैर्वचनैरभिहितः । भोः कृतघ्न, मा मे संमुखं मुखं दर्शय यतस्त्वं मित्रं नित्यमेवोपजीव्यागच्छसि । तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेणापि न करोषि । तत्त्वं मम देवरं गृहीत्वाऽद्य प्रत्युपकारार्थं गृहमागच्छ । अथवा त्वया सह मे परलोके दर्शनम् । तदहं तयैवं प्रोक्तस्तव सकाशमागतः । तदागच्छ मे गृहम् । सोत्कण्ठा च सा द्वारदेशे तिष्ठति । मर्कट आह । भो मित्र, युक्तमभिहितं मद्भ्रातृपत्न्या । उक्तं च ।

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ ३ ॥

परं वयं वनचराः । युष्मदीयं जलान्ते गृहम् । तत्कथमपि न शक्यते तत्र गन्तुम् । तस्मात्तामपि मे भ्रातृपत्नीमत्रानय येन तस्याः प्रणम्याशिर्वादं गृह्णामि । स आह । भो मित्र, अस्ति समुद्रान्ते रम्ये पुलिनप्रदेशेऽस्मद्गृहम् । तन्मम पृष्ठमारूढः सुखेनाकुतभयो गच्छ सोऽपि तच्छ्रुत्वा सानन्दमाह ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भद्र, यद्येवं तत्किं विलम्ब्यते । त्वर्यताम् । अहं तव पृष्ठारूढः । तथानुष्ठिते गच्छन्तमगाधजले मकरमवलोक्य भयत्रस्तमना वानरः प्रोवाच । भ्रातः शनैः शनैर्गम्यताम् । जलकल्लोलैः प्लावितं मे शरीरम् । तदाकर्ण्य मकरश्चिन्तयामास । असावगाधं जलं प्राप्तो वशः संजातो मत्पृष्ठगतस्तिलमात्रमपि चलितुं न शक्नोति । तस्मात्कथयामि निजाभिप्रायं येनाभीष्टदेवतास्मरणं करोति । आह च मित्र, त्वं मया वधाय समानीतो भार्यावाक्याद्विश्वास्य । तत्स्मर्यतामभीष्टदेवता । स आह । भ्रातः किं मया तस्यास्तवापि चापकृतं येन मे वधोपायश्चिन्तितः । मकर आह । भोस्तस्यास्तावत्तव हृदयस्यामृतमयरसफलास्वादनामृष्टस्य भक्षणार्थं दोहदः संजातः । तेनैतदनुष्ठितम् । वानर आह । भद्र, यद्येवं तत्किं त्वया मम तत्रैव न व्याहृतं येन स्वहृदयं जम्बूकोटरे सदैव मया सुगुप्तं कृतं तद्भ्रातृपत्न्या अर्पयामि । त्वयाहं शून्यहृदयोऽत्र कस्मादानीतः । तदाकर्ण्य मकरः सानन्दमाह । भद्र यद्येवं तदर्पय मे हृदयं येन सा दुष्टपत्नी तद्भक्षयित्वानशनादुत्तिष्ठति । अहं त्वां तमेव जम्बूपादपं प्रापयामि । एवमुक्त्वा निवर्त्य जम्बूतलमगात् । वानरोऽपि कथमपि जल्पितविविधदेवतोपचारपूजस्तीरमासादितवान् । ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारूढश्चिन्तयामास । अहो लब्धाः प्राणास्तावत् । अथवा साध्विदमुच्यते ।

न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ४ ॥

इति चिन्तयानं तं मकर आह । भो मित्र, अर्पय तद्धृदयं यथा ते भ्रातृपत्नी भक्षयित्वानशनादुत्तिष्ठति । अथ विहस्य निर्भर्त्स्ययन् वानरस्तमाह । धिङ्मूर्ख, विश्वासघातक, किं कस्य हृदयद्वयं भवति । तद्गम्यताम् जम्बूवृक्षस्याधस्तान्न भूयोऽपि त्वयात्रागन्तव्यम् । पञ्चतन्त्रे चतुर्थतन्त्रम् ।

अभ्यासः—१ मय प्रत्यय लावून शब्द बनवा. उदा० अमृतमयः ।
२ आर्ष प्रयोगः—तस्याः प्रणम्य । भ्रातृपत्न्याः अर्पयामि ।
३ वाक्यांत योजाः:—धिक्, विना, सह.
४ वाक्प्रचारः—किं तव अपकृतम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३१ आत्रेयीवासन्त्योः संवादः ।

परिचयः—भवभूती हा कालिदासासारखाच श्रेष्ठ कवी. त्यानें उत्तर रामचरित नाटक लिहिलें. त्याच्या तीन नाटकांत हेंच नाटक श्रेष्ठ आहे. करुण-रसाच्या वर्णनानें हा दगडांनाही पाझर फोडील. याची भाषा फार मार्मिक आहे.

(नेपथ्ये ।) स्वागतं तपोधनायाः ।

(ततः प्रविशति अध्वगवेषा तापसी ।)

तापसीः—अये वनदेवतेयं फलकुसुमगर्भेण पल्लवार्घ्येण दूरान्मामुपतिष्ठते ।

(प्रविश्य)

वनदेवताः—(अर्घ्यं विकीर्य ।)

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

तापसीः—किमत्रोच्यते ।

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

(उपविशतः ।)

वनदेवताः—कां पुनरत्रभवतीमवगच्छामि ।

तापसीः—आत्रेय्यस्मि ।

वनदेवताः—आर्ये आत्रेयि, कुतः पुनरिहागम्यते । किंप्रयोजनो वा दण्डकारण्यप्रवेशः ।

आत्रेयी—अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां
वाल्मीकिपार्श्वादिह पर्यटामि ॥ ३ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वनदेवताः—यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते तत्कोऽयमार्याया दीर्घप्रवासप्रयासः ।

आत्रेयीः—तत्र महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासोङ्गीकृतः ।

वनदेवताः—कीदृशः ।

आत्रेयीः—तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम् । तत्खलु न केवलमृषीणामपि तु चराचराणां भूतानामान्तराणि तत्त्वान्युपस्नेहयति ।

वनदेवताः—अपि तयोर्नामसंविज्ञानमस्ति ।

आत्रेयीः—तयैव देवतया तयोः कुशलवाविति नामनी प्रभावश्राव्यातः ।

वनदेवताः—कीदृशः प्रभावः ।

आत्रेयीः—तयोः किल सरहस्यानि जृम्भकास्त्राण्याजन्मसिद्धानीति ।

वनदेवताः—अहो नु भोश्चित्रमेतत् ।

आत्रेयीः—तौ च भगवता वाल्मीकिना धात्रीकर्मतः परिगृह्य पोषितौ रक्षितौ च । निर्वृत्तचौलकर्मणोश्च तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः । समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ । न ह्येताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति । यतः ।

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च तयोर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥ ४ ॥

वनदेवताः—अयमसावध्ययनप्रत्यूहः ।

आत्रेयीः—अन्यच्च ।

वनदेवताः—अथापरः कः ।

आत्रेयीः—अथ स ब्रह्मर्षिरेकदा माध्यंदिनसवनाय नदीं तमसामनुप्रपन्नः । तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श । आकस्मिकप्रत्यवभासां च देवीं वाचमनुष्टुप्छंदसा परिणतामभ्युदैरयत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥

वनदेवताः—चित्रमाम्नायादन्यो नूतनश्छन्दसामवतारः ।

आत्रेयीः—तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसङ्गम्य भगवान्भूतभावनः पद्मयोनिरवोचत् । ऋषे, प्रबुद्धोऽसि वागात्मनि ब्रह्मणि । तद्ब्रूहि रामचरितम् । अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु । आद्यः कविरसि इत्युक्त्वा तत्रैवान्तर्हितः । अथ स भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय ।

वनदेवताः—हन्त तर्हि मण्डितः संसारः ।

आत्रेयीः—तस्मादवोचं तत्र महानध्ययनप्रत्यूह इति ।

वनदेवताः—क्ष्म्यते ।

आत्रेयीः—विश्रान्तासि भद्रे । संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वनदेवताः—इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रेयीः—(सास्रम्) अप्येतत्तपोवनम् । अप्येषा पञ्चवटी । अपि सरिदियं गोदावरी । अप्ययं गिरिः प्रस्रवणः । अपि जनस्थानवनदेवता वासन्ती त्वम् ।

वनदेवताः—तथैव तत्सर्वम् ।

आत्रेयीः—हा वत्से जानकि ।

स एष ते वल्लभशाखिवर्गः प्रासङ्गिकीनां विषयः कथानाम् ।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव नः करोति ॥ ६ ॥

वासन्तीः—(सभयम् स्वगतम् ।) कथं नामशेषामित्याह । (प्रकाशम्) आर्ये किमित्याहितं सीतादेव्याः ।

आत्रेयीः—न केवलमित्याहितं सापवादमपि । (कर्णौ ।) एवमिव ।

वासन्तीः—अहह दारुणो दैवनिर्घातः । (इति मूर्च्छति ।)

आत्रेयीः—भद्रे समाश्वसिहि समाश्वसिहि ।

वासन्तीः—हा प्रियसखि, हा महाभागे, ईदृशस्ते निर्माणभागः । हा रामभद्र । अथवा अलं त्वया । आर्ये आत्रेयि, अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आत्रेयीः—नहि नहि ।

वासन्तीः—हा कष्टम् । आर्याऽरुन्धतीवसिष्ठाधिष्ठितेषु नः कुलेषु जीवन्तीषु च प्रवृद्धासु राज्ञीषु कथमिदं जातम् ।

आत्रेयीः—ऋष्यशृङ्गाश्रमे गुरुजनस्तदासीत् । संप्रति तु परिसमाप्तं तद्द्वादशवार्षिकं सत्रम् । ऋष्यशृङ्गेण च सम्पूज्य विसर्जिता गुरवः । ततो भगवत्यरुन्धती नाहं वधूविरहितामयोध्यां गमिष्यामीत्याह । तदेव राममातृभिरनुमोदितम् । तदनुरोधाद्भगवतो वसिष्ठस्य परिशुद्धा वाचो वाल्मीकितपोवनं गत्वा तत्र वत्स्याम इति ।

वासन्तीः—अथ स राजा किमाचारः संप्रति ।

आत्रेयीः—तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः ।

वासन्तीः—हा धिक् परिणीतमपि ।

आत्रेयीः—शान्तं पापम् । नहि नहि ।

वासन्तीः—का तर्हि यज्ञे सहधर्मचारिणी ।

आत्रेयीः—हिरण्मयी सीताप्रतिकृतिः ।

वासन्तीः—हन्त भोः

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥ ७ ॥

आत्रेयीः—विसृष्टश्च वामदेवाभिमंत्रितो मेध्योऽश्वः । उपकल्पिताश्च तस्य यथाशास्त्रं रक्षितारः । तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुरवाप्तदिव्यास्त्रसंप्रदायश्चतुरङ्गसाधनान्वितोऽनुप्रहितः ।

वासन्तीः—(सस्नेहकौतुकास्त्रम् ।) कुमारलक्ष्मणस्यापि पुत्रः । हन्त मातर्जीवामि ।

आत्रेयीः—अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुक्षिप्य राजद्वारे सोरस्ताडमब्रह्मण्यमुद्घोषितम् । ततो न राजापचारमन्तरेण प्रजास्वकालमृत्युः संचरतीत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत् ।

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः ।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम् ॥ ८ ॥

इत्युपश्रुत्यैवाकृष्टकृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शूद्रतापसान्वेषणाय जगत्पतिः संचरितुमारब्धवान् ।

वासन्तीः—शम्बूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति । तदपि नाम रामभद्रः पुनरपीदं वनमलङ्कुर्यात् ।

आत्रेयीः—भद्रे, आगम्यतेऽधुना ।

वासन्तीः—आर्ये आत्रेयि, एवमस्तु । कठोरीभूतस्तु दिवसः ।

उत्तररामचरितम् ।

अभ्यासः—१ समासः—नामशेषाम्, सापवादम्, सोरस्ताडम् ।

२ च्विप्रत्ययान्त रूपें सांगा. उदा० कठोरीभूतः

---

३२ पुष्पोद्भवकथा ।

संदर्भः—दशकुमारचरितांतील एका कुमाराची ही जन्मकथा आहे.

कदाचिद्रामदेवशिष्यः सोमदेवशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत । 'देव, रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि । 'स्थविरे, का त्वम् । एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसि' इति । वृद्धयाप्यभाषि । 'मुनिवर, कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नदिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद्वीपादागतो मगधनाथमन्त्रिसम्भवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसम्पदा श्वशुरेण संमानितोऽभूत् । कालक्रमेण नताङ्गी गर्भिणी जाता । ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललोचनयाऽनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत् । गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यानायि' इति ।

तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम् । निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेण न्यपतत् । भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत् । चिरायुष्मत्तया स चोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत् । सोऽपि मर्कटः क्वचिदगात् । बालकेन सत्त्वसंपन्नतया सकलक्लेशसहेनाभावि । केसरिणा करिणं निहत्य कुत्रचिदगामि । लतांगृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मि इति । सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा 'रत्नोद्भवः कथमभवत्' इति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय सुश्रुताय विषादसन्तोषावनुभवंस्तदनुजतनयं समर्पितवान् ।

दशकुमारचरितम् ।

अभ्यासः—१ वाक्यांत योजाः—प्र+स्था, परां काष्ठां गम्, अभितः

२ प्रयोग बदलाः—बालकेन सकलक्लेशसहेन अभावि ।

मया कुमारोप्यानायि । वृद्धयाप्यभाषि ।

---

३३ चन्द्रापीडस्य विद्याग्रहणम् ।

संदर्भः—चन्द्रापीड हा तारापीडाचा मुलगा. तारापीड हा राजा होता. त्याचा प्रधान शुकनास. शुकनासाचा मुलगा वैशंपायन. चंद्रापीडाच्या विद्याभ्यासाकरितां तारापीडानें खास सोय केली होती.

तारापीडः क्रीडाव्यासङ्गविधातार्थं बहिर्नगरादर्धक्रोशमात्रायामं महता प्राकारमण्डलेन परिवृतं विस्तृतपरिखावलयेन परिवेष्टितमतिदृढकपाटसंपुटमुद्घाटितैकद्वारप्रवेशमधःकल्पितव्यायामशालममरागाराकारं विद्यामन्दिरमकारयत् । सर्वविद्याचार्याणां च संग्रहे यत्नमतिमहान्तमन्वतिष्ठत् । तत्रस्थं च तं केसरिकिशोरकमिव पञ्जरगतं कृत्वा प्रतिषिद्धनिर्गममाचार्यकुलपुत्र-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रायपरिवारं चन्द्रापीडं शोभने दिवसे वैशम्पायनद्वितीयमाचार्येभ्योऽखिल विद्योपादानार्थमर्पयांबभूव ।

चन्द्रापीडोऽप्यनन्यमानसतया तथा नियंत्रितो राज्ञाचिरेणैव कालेन यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमानः सर्वा विद्या जग्राह । मणिदर्पण इवातिनिर्मले तस्मिन्संचक्राम सकलः कलाकलापः । तथा हि पदे वाक्ये प्रमाणे धर्मशास्त्रे राजनीतिषु व्यायाम-विद्यासु चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायुधविशेषेषु रथचर्यासु गजपृष्ठेषु तुरङ्गमेषु वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषु वाद्येषु भरतादिप्रणीतेषु नृत्तशास्त्रेषु नारदीयप्रभृतिषु गान्धर्ववेदविशेषेषु हस्तिशिक्षायां तुरगवयोज्ञाने पुरुषलक्षणेषु चित्रकर्मणि पुस्तकव्यापारे लेख्यकर्मणि सर्वासु द्यूत्कलासु गन्धर्वशास्त्रेषु शकुनिरुतज्ञाने ग्रहगणिते रत्नपरीक्षासु दारुकर्मणि दन्तव्यापारे वास्तुविद्यास्वायुर्वेदे विषापहरणे तरणे लङ्घने प्लुतिष्वारोहणे रतितंत्रेष्विन्द्रजाले कथासु नाटकेषु काव्येष्वाख्या-यिकासु महाभारतपुराणेतिहासरामायणेषु सर्वलिपिषु सर्वदेशभाषासु सर्वशिल्पेषु छन्दस्त्येष्वपि कलाविशेषेषु परं कौशलमवाप । वैशम्पायनोऽपि तं सर्वाभिः कलाभिरनुचकार ।

कादम्बरी ।

अभ्यासः—१ समास सोडवा—अमरागाराकारम् । क्रीडाव्यासङ्ग-विघातार्थम् । अनन्यमानसतया ।

२ विद्या व कला यांची संख्या मोजा.

---

३४ उपहारवर्मजन्मकथा ।

संदर्भः—उपहारवर्मा हा दहा कुमारांपैकीं एक. दशकुमारचरितांतील याची गोष्ट मनोरंजक आहे.

अथ कदाचिदेकेन तापसेन रसेन राजलक्षणविराजितं कंचिन्नयना-नन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि । भूवल्लभ, कुशसमिदानयनाय वनं गतेन मया काचिदशरण्या व्यक्तकार्पण्याश्रु मुञ्चन्ती वनिता विलोकिता । निर्जने वने किंनिमित्तं रुद्यते त्वयेति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सगद्गदं मामवोचत् । मुने, लावण्यजितपुष्पसायके मिथिलानायके कीर्ति-व्यापृतसुधर्मणि निजसुहृदो मगधराजस्य सीमन्तिनीसीमन्तमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कंचित्कालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात् । तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये वर्तमाने सुहृत्साहाय्यं कुर्वाणो निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा जयवता रिपुणाऽभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत् । ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शवरबलेन रभसादभिहन्यमाने मूलबलाभिरक्षितावरोधः स महानिरोधः पलायिष्ट । तदीयार्भकयोर्यमयोर्धात्रीभावेन परिकल्पिताहं मद्दुहितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमे अभूव । तत्र विवृतवदनः कोऽपि रूपी कोप इव व्याघ्रः शीघ्रं मामाघ्रातुमागतवान् । भीताहमुदग्रघ्राणि स्खलन्तो पर्यपतम् । मदीयपाणिभ्रष्टो बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत । तच्छवाकर्षिणो व्याघ्रस्य प्राणान् बाणो बाणासनयन्त्रमुक्तोऽपाहरत् । विलोलालको बालकोऽपि शवरैरादाय कुत्रचिदुपानीयत । कुमारमपरमुद्वहन्ती मद्दुहितापि कुत्र गता न जाने । साहं मोहं गता केनापि वृष्णिपालेन स्वकुटीरमावेश्य विरोपितव्रणाऽभवम् । ततः स्वस्थीभूय भूयः क्ष्माभर्तुरन्तिकमुपतिष्ठासुरसहायतया दुहितुरनभिज्ञाततया च व्याकुलीभवामीत्यभिदधाना एकाकिन्यपि स्वामिनं गमिष्यामीति सा तदैव निरगात् ।

अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवंस्वदन्वयाङ्कुरं कुमारमन्विष्यंस्तदैकं चण्डिकामन्दिरं सुन्दरं प्रागाम् । तत्र संततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः 'महीरुहशाखावलम्बिनमेनमसिलतया वा, सैकततले खननिक्षिप्तचरणं लक्षीकृत्य शितशरनिकरेण वा, पलायमानमनेकचरणैः कुक्कुरव्रालकैर्वा दंशयित्वा संहनिष्यामः' इति भाषमाणा मया समभ्यभाष्यन्त । 'ननु किरातोत्तमाः, घोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचिदन्तरमगच्छम् । स कुत्र गतः केन वा गृहीतः, परीक्ष्यापि न वीक्ष्यते । तन्मुखालोकनेन विनानेकान्यहान्यतीतानि । किं करोमि, क्व यामि, भवद्भिर्न किमदर्शि' इति । 'द्विजोत्तम, कश्चिदत्र

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तिष्ठति । किमेषस्तव नन्दनः सत्यमेव । तदेनं गृहाण' इत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन् । तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि । एनमायुष्मन्तं पितृरूपो भवानभिरक्षतात्' इति । राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किंचिदधरीकृत्य तमुपहारवर्मनान्नाऽऽहूय राजवाहनमिव पुपोष ।

दशकुमारचरितम् ।

अभ्यासः—१ ओळखा—स्वस्थीभूय, पलायिष्ट, अगात्, उपतिष्ठासुः

२ सति सप्तमीची उदाहरणें पाठांतील द्या.

३ च्विरूपें:—अधरीकृत्य, अङ्गीकृत्य.

द्वितीयः खण्डः

३५ दिलीपो नन्दिनीमाराधयति ।

संदर्भः—दिलीप हा सूर्यवंशांतील राजा होय. रघुवंशाचें वर्णन करतांना या राजापासूनच कालिदासानें आरंभ केला. सार्वभौम राजा असून त्यास संतती नव्हती. म्हणून तो वसिष्ठ ऋषीकडे गेला. वसिष्ठ ऋषीनीं संतति न होण्याचें कारण सांगून त्यावर उपायहि सांगितला.

आसीद्वैवस्वतो मनुर्नाम महीक्षितामाद्यो मनीषिणां माननीयश्च क्षितिपतिः । तदन्वये राजेन्दुर्दिलीपः प्रसूतः । व्यूढोरस्को वृषस्कन्धो महाभुजः स राजा प्रजानामेव भूत्यर्थं ताभ्यो बलिमग्रहीत् । प्रजानां विनयाधानाद्रक्षणाद्भरणादपि स एव तासां पिता बभूव । तस्य राज्ञः पत्नी सुदक्षिणा नाम । विभवसंपन्नोऽपि स भूपतिरपत्यमुखदर्शनसुखं चिरं न लेभे । अतः सचिवेषु राज्यभारं निक्षिप्य संतानार्थाय विधये सुदक्षिणया सह स राजा गुरोर्वसिष्ठस्याश्रमं जगाम । आश्रमसमीपं गत्वा हयान् विश्रामयेति सारथिं समादिश्य नृपतिः पत्नीं रथादवारोहयत्स्वयं चावततार । सर्वे मुनयः सभार्याय तस्मै माननीयायार्हणां चक्रुः । भूपतिरपि सायंतनस्य विधेरन्ते तं तपोनिधिं ददर्श । दृष्ट्वा च तमरुन्धतीसहितं वसिष्ठं दिलीपो राज्ञी च मागधी तयोः पादाञ्जगृहतुः । गुरुर्गुरुपत्नी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च तौ दम्पती प्रीत्या प्रतिननन्दतुः । अथ मुनिस्तं राज्ये कुशलं पप्रच्छ महीपतिरपि सुतमुखदर्शनं विना सर्वं कुशलं विज्ञापयामास ।

एवं विज्ञापितो राज्ञा स ऋषिः क्षणमात्रं ध्यानस्तिमितलोचनस्तस्थौ । प्रणिधानेन च तस्य संततेः स्तम्भकारणं ददर्श । अथ स राजानमब्रवीत् । पुरा शक्रमुपस्थायोर्वीं प्रति यास्यतस्तव पथि कल्पतरुच्छायामाश्रिता सुरभिरासीत् । प्रदक्षिणक्रियार्हायां च तस्यां त्वं साधु नाचरः । अतः सा त्वां शशाप । यस्मात्त्वं मामवजानासि तस्मात् मत्प्रसूतिमनारध्य ते प्रजा न भविष्यतीति । स शापो त्वया वा तव सारथिना न श्रुतः । अतस्तदीयां सुतां नन्दिनीं सुरभेः प्रतिनिधिं कृत्वा सपत्नीकस्त्वमाराधय । प्रीता हि सा कामदुघा भवतीति ।

अस्मिन्नेव काले नन्दिनी वनादावृते । तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः पुनरब्रवीत् । राजन्, नाम्नि कीर्तित एवेयं कल्याण्युपस्थिता । एनां प्रसादयितुमर्हसि । प्रस्थितायां तस्यां प्रतिष्ठेथाः, स्थितायां तस्यां स्थितो भव, निषण्णायां त्वं निषीद, अस्यां पीताम्भसि त्वमपः पिबेः । इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव । देशकालज्ञो राजा तथेति गुरोरादेशं प्रतिजग्राह ।

अथान्येद्युः प्रभाते प्रजानाधिपस्तां धेनुं वनाय मुमोच । तस्य धर्मपत्नी सुदक्षिणापि तमनुससार । दयालुर्नृपस्तां दयितां निवर्त्य सौरभेयीं नन्दिनीमुर्वीमिव जुगोप । धेनोरनुचरेण तेनानुयायिवर्गोऽपि न्यषेधि । वनं गाहमाने तस्मिन्राजनि वृष्ट्यापि विना दवाग्निः शशाम । फलपुष्पवृद्धिर्विशेषाऽऽसीत् । ऊनं सत्त्वं सत्त्वेष्वधिको न बबाधे । दिगन्तराणि संचारपूतानि कृत्वा दिनान्ते सुरभिर्निलयाय गन्तुं प्रचक्रमे । आश्रमागतां तां सुदक्षिणा प्रणम्य तस्याः शृङ्गान्तरमानर्च ।

इत्थं महिष्या समं प्रजार्थं व्रतं धारयतस्तस्य राज्ञस्त्रिगुणानि सप्त दिनानि व्यतीयुः । अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुर्गौरीगुरोर्गन्धहरामविवेश । मनसापि हिंस्रैः सा दुष्प्रधर्षेति मन्यमानः स राजा क्षणमात्रमद्रिशोभाप्रहितेक्षणो बभूव । अनवहिते तस्मिन् कश्चिंसिंहस्तां बलात्कारेण चकर्ष किल । अथ धेनोराक्रन्दितमाकर्ण्य नृपतिस्तं हन्तुं ,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निपङ्क्ताच्छरमुद्धर्तुमियेष । परं तस्य वामेतरः करः सायकपुङ्खे सक्ताङ्गुलिर्बभूव । तदवस्थं राजानं दृष्ट्वा मृगेन्द्रोऽब्रवीत् ।

रघुवंशः ।

अभ्यासः—१ समासः— ध्यानस्तिमितलोचनः । अपत्यमुखदर्शन सुखम् । २ तद्धित रूपेः—सौरभेयी, वैवस्वतः, तदीया. ३ शब्द चालवा—युवन्, अस्थि, मथिन्.

---

३६ सिंहदिलीपयोः संवादः ।

संदर्भः—पुत्रप्राप्तीकरितां दिलीप राजानें गाईची (नन्दिनीची) सेवा करण्यास आरंभ केली. तो तिला दररोज वनांत चरावयास घेऊन जाई. तिच्या रक्षणाचें काम त्याच्याकडे होतें. एकदां ती हिमालयाच्या गुहेंत शिरली. तेथें एका सिंहानें तिच्यावर झडप घातली. त्याला मारण्याकरितां राजा भात्यांतून बाण काढीत असतां त्याचा हात भात्यालाच चिकटला. तेव्हां पुढील संवाद सिंह व राजा यांमध्यें झाला.

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन्विस्मितमात्मवृत्तौ सिंहोऽस्सत्त्वं निजगाद सिंहः ॥ १ ॥
अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥ २ ॥
कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥ ३ ॥
अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥ ४ ॥
कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥ ५ ॥
तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ॥ ६ ॥
तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥ ८ ॥
इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥ ९ ॥
प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥ १० ॥
संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ॥ ११ ॥
मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥ १२ ॥
स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥ १३ ॥
अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ॥ १४ ॥
एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहुहातुमिच्छन्निचारमूढः प्रतिभासि मे त्वम् ॥ १५ ॥
भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥ १६ ॥
अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोघ्नीः ॥ १७ ॥
तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥ १८ ॥
एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥ १९ ॥
निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥ २० ॥
क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥ २१ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्याम् ॥ २२ ॥
सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥ २३ ॥
भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥ २४ ॥
किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ॥ २५ ॥
संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते ।
तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ॥ २६ ॥
तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ॥ २७ ॥
तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥ २८ ॥
उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतःप्रस्रविणीं न सिंहम् ॥ २९ ॥
तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥ ३० ॥
भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥ ३१ ॥
ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ॥ ३२ ॥

रघुवंशः ।

अभ्यासः—१ शब्द चालवा—स्त्री, उशनस्, अदस्.
२ वर्तमानकाळीं चालवा—भी, शास्, हा, हन्.
३ समास—सादरम्, देशान्तरम्, निरवधि.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३७ संजीविनीविद्याग्रहणम् ।

संदर्भः—देवदैत्यांच्या युद्धांमध्यें देवानीं मारलेले दैत्य शुक्राचार्य आपल्या संजीविनी विद्येनें पुन्हा जिवंत करीत. शुक्राचार्य हे दैत्यांचे गुरु. त्यांच्यापासून संजीविनी विद्या मिळविण्याकरितां इन्द्रानें कचास पाठविलें. कच हा देवांच्या गुरूचा–बृहस्पतीचा-मुलगा.

पुरा किल युगानुयुगपरस्परविद्वेषिणोर्देवदानवयोर्मध्ये सकललोकसंतापकारकं घोरं युद्धमभूत् । तदाऽसुरगुरुरुशनाः संजीविनीमंत्रबलेनामरहतानसुरान्पुनः पुनः संजीव्य दैत्यनाथस्य वृषपर्वणः समीहितमसाधयत् । देवगुरुर्बृहस्पतिर्युद्धकलाविशारदोऽपि संजीवन्यपरिज्ञानादसुरहतानमरान्पुनर्जीवयितुं नाशक्नोत् । तस्मिन्नवसरेऽव्याहतजयाकाङ्क्षी देवेन्द्रः संजीविनीप्राप्त्युपायं व्यरचयत् । तथा हि । स कार्याकार्यविचारसमर्थं इष्टकार्यसंसिद्धितत्परः सकलविद्यापारंगतमपि स्वगुरुसुतं कचं संप्रार्थ्य विद्याभ्यासनिमित्तेन शुक्रसदनं प्राहिणोत् । शुक्रोऽपि तं गुरुसेवानिरतं सकलपरिवारानन्दकरं श्रुतिस्मृतिपुराणेतिहासशास्त्रसंगीतकाव्यनाटकसुभाषितालङ्कारकोविदं सर्वविद्याविशारदं विबुधजननायकं दयान्वितचेतसा पर्यपालयत् । अनन्तरं कतिपयैरेव वर्षैस्तदागमनसंक्रुद्धैरसुरैः पुनः पुर्निहन्यमानोऽपि कचः प्राक्तनबलेन पुनःपुनः संजीव्य गुरुप्रसादात्संजीविनीं समासाद्य पितृसकाशं गन्तुकामः परमकारुणिकं शिष्यवत्सलं महानुभावं दैत्यगुरुं गृहगमनानुज्ञायै प्रार्थयामास । तस्मिन्नेवावसरे सद्गुणसदाचारसुविद्यतालुब्धा निकटसहवासक्रीडाविनोदलालसा काव्यकन्यका देवयानी नाम स्वपाणिग्रहणाय तं व्यजिज्ञपत् । कचस्तु देवकार्याभिमानी स्वकार्यसाधनतत्परस्तस्याः पूर्वाचरितानि सप्रेमपालनपोषणादीनि कर्माण्यविगणय्य तां निषिध्य चेष्टमनोरथावाप्तिहृष्टमानसः प्रस्थितोऽभूत् । तदा सा विफलमनोरथा दैत्यगुरुकन्यकातिरुष्टा तमकृतोपकारज्ञं सुरगुरुनंदनं शशाप । मामवधीर्यं गच्छसि चेन्न ते संजीविनीविद्या सफला भविष्यति । न कोऽपि विप्रकुमारस्ते पाणिं गृह्णीयादिति कचोऽपि तां प्रतिशप्य स्वर्गलोकं जगाम । अनन्तरं सा भग्नमानसा सुंदरी देवयानी सोमवंशसमुद्भवस्य नृपस्य ययातेर्गृहिणी बभूव ।

मनोरमामाधवम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः—१ संधि करा—तत् + मया + एतत् + श्रुतम्।
२ वाक्यांत योजा—अधि + शी, आ + मंत्र्, स.
३ ओळखा—निर्विण्णाः, अक्षालि, निर्याय.

---

३८ मुमूर्षुः पिता हर्षदेवं (पुत्रं) पश्यति।

संदर्भः—राजा हर्षदेव मरणोन्मुख असलेल्या आपल्या पित्यास भेटण्यास लांबून आल्यावर पितापुत्रांची भेट झाली. त्या भेटीनें पित्याला झालेल्या आनंदाचें वर्णन या पाठांत आहे.

अवनिपतिस्तु दूरादेव दृष्ट्वाऽतिदयित तनयं तदवस्थोऽपि प्रसार्य भुजौ एह्येहीत्याह्वल्शरीरार्धेन शयनादुदगात्। ससंभ्रममुपसृतं चैनं विनयावनम्रमुन्नमय्य वल्गदुरसि निवेश्य विशन्निव प्रेम्णा निशाकरमण्डलमध्यं, मज्जन्निवामृतमये महासरसि, पीडयन्नङ्गैरङ्गानि, विस्मृतज्वरसंज्वरः सुचिरमालिलिङ्ग। पस्पर्श च पुनः पुनर्वेपथुमता पाणितलेन क्षयक्षामकण्ठश्च कृच्छ्रादिवावादीत्। वत्स कृशोऽसीति। भण्डिस्त्वकथयत्। देव, तृतीयमहः कृताहारस्याद्येति। तच्छ्रुत्वा बाष्पवेगगृह्यमाणाक्षरं कथं कथमप्यायतं दीर्घं च निश्श्वस्योवाच। वत्स, जानामि त्वां पितृप्रियमतिमृदुहृदयम्। नार्हस्यतिमात्रमात्मानं शोकानले प्रक्षेप्तुम्। निशितमिव शस्त्रं तक्ष्णोति मां त्वदीयस्तनिमा। न ह्यल्पपुण्यभाजां वंशमलङ्कुर्वन्ति भवादृशाः। त्वज्जन्मनैव कृतार्थोऽस्मि। निरभिलाषोऽस्मि जीविते। भिषगनुरोधः पाययति मामौषधम्। प्रजाभिस्तु बन्धुमन्तो राजानो न ज्ञातिभिः। तदुत्तिष्ठ। कुरु पुनरेव सर्वाः क्रियाः। कृताहारे च त्वय्यहमपि स्वयमुपयोक्ष्ये पथ्यम्।

इत्येवमभिहितस्य हर्षदेवस्य हृदयं धक्ष्यन्निवातितरां शोकानलः सन्दुधुक्षे। क्षणमात्रं च स्थित्वा पित्रा पुनराहारार्थमादिश्यमानो धवलगृहादवततार।

हर्षचरितम्।

अभ्यासः—१ वाक्यांत योजा—अलम्, को गुणः, वरं—न. २ प्रयोग बदला—जम्बुमाली जहौ प्राणान्। हा हन्त हन्त नलिनीं गज उज्जहार। ३ ओळखा—जिघांसति, अगुः, पेपीयते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३९ शबरजीवनम् ।

संदर्भः—शबरसैन्य अरण्यांत शिकारीकरितां आलें असतां सर्व पशु-पक्ष्यांची मोठी धांदल उडाली. एका झाडावर हा पोपट (शुक) आपल्या प्रियेसह राहात होता. त्या पोपटानें केलेलें हें शबरजीविताचें वर्णन आहे. तो पोपट शूद्रक राजाला आपली जन्मकथा सांगत आहे.

(पञ्जरस्थः शुकः कथयति)

मध्ये च तस्यातिमहतः शबरसैन्यस्य, प्रथमे वयसि वर्तमानमति-कर्कशत्वादायसमयमिव निर्मितं, एकलव्यमिव जन्मान्तरागतं, अपत्यमिव विन्ध्यस्य, सहोदरमिव पापस्यांशावतारमिव कृतान्तस्य, अनभिभवनीयाकृतिं मातङ्गकनामानं शबरसेनापतिमपश्यम् । अभिधानं तु पश्चात्तस्याहमश्रौषम् । दृष्ट्वा च तमासीच्च मे मनसि । अहो मोहप्रायमेतेषां जीवितं, साधुजन-विगर्हितं च चरितम् । तथा हि । पुरुषपिशितोपहारे धर्मबुद्धिः । आहारः साधुजननिन्दितो मधुमांसादिः । श्रमो मृगया । शाखं शिवारुतम् । समु-पदेष्टारः सदसतां कौशिकाः । प्रज्ञा शकुनिज्ञानम् । परिचिताः श्वानः । राज्यं शून्यास्वटवीषु । आपानकमुत्सवः । मित्राणि क्रूरकर्मसाधनानि धनूंषि । सहाया विपदिग्धमुखा भुजङ्गा इव सायकाः । कलत्राणि बन्दिगृहीताः परयोषितः । क्रूरस्वभावैः शार्दूलैः सह संवासः । पशुरुधिरेण देवतार्चनम् । मांसेन बलिकर्म । चौर्येण जीवनम् । भूषणानि भुजङ्गमणयः । वनगजमदै-रङ्गरागः । यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषतः कुर्वते । इत्येवं चिन्तयत्येव मयि स शबरसेनापतिरटवीश्रमणसमुद्भवं श्रममपनिनीषु-रागत्य तस्यैव शाल्मलीतरोरधश्छायायां पल्लवासने समुपाविशत् ।

कादम्बरी ।

अभ्यासः—१ ओळखा–अध्याप्यताम्, प्रतिपत्स्ये । २ प्रयोजक करा–सीता रथमारुरोह । किन्नरा राज्ञो यशोऽगायन् । ३ शब्द चालवा–पति, अस्मद्, वृत्रहन्, दधि.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४० अन्योक्तयः ।

परिचयः—भामिनीविलास हें जगन्नाथ पंडिताचें काव्य होय. यांतील अन्योक्ती प्रसिद्ध आहेत. जगन्नाथ पंडिताविषयीं व अन्योक्तींची विशेष माहिती शेवटीं दिलेल्या टीपांत पाहा.

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥ १ ॥

पुरा सरसि मानसे विकचसारसालिस्खलत्—
परागसुरभीकृते पयसि यस्य यातं वयः ।
स पल्वलंजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ २ ॥

अयि दलदरविन्द स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्—
परिमलमयमन्यो बान्धवो गन्धवाहः ॥ ३ ॥

नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीताऽसि ॥ ४ ॥

तावत्कोकिल विरसान् यापय दिवसान्वनान्तरे निवसन् ।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ५ ॥

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥ ६ ॥

याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसंततिरसौ संतापमालाकुला ।
एवं यस्य निरन्तराधिपटलैर्नैल्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः ॥ ७ ॥

आपदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ ८ ॥
एकस्त्वं गहनेऽस्मिन् कोकिल न कलं कदाचिदपि कुर्याः ।
साजात्यशङ्क्याऽमी न त्वां निघ्नन्ति निर्दयाः काकाः ॥ ९ ॥
कलभ तवान्तिकमागतमलिमेनं मा कदाऽप्यवज्ञासीः ।
अपि दानसुन्दराणां द्विपधुर्याणामयं शिरोधार्यः ॥ १० ॥
अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर धन्योऽसि ॥ ११ ॥

भामिनीविलासः ।

अभ्यासः—१ संधि करा–षट्+मासाः, हरे+एहि, एतस्मिन्+अटवी-मध्ये, सर्वस्मिन्+चित्रे. २ समास सोडवा–द्विजिह्व, पुष्प-सायकः, यथेष्टम्.

---

४१ सेयं याति शकुन्तला पतिगृहम् ।

संदर्भः—शाकुंतल नाटकांतील उत्तम प्रवेशांपैकीं हा एक प्रवेश आहे. शकुंतला दुष्यंत राजाकडे जाण्यास निघण्यापूर्वी तिच्या अंगावर घालण्याकरितां तपोवनांतील वृक्षांनीं अलंकार दिले. नंतर ती पतिगृही जाण्यास निघाली असतां कण्व महर्षींच्या मनाची स्थिती कशी झाली होती तें वर्णन या भागांत आहे. तसेंच शाकुंतलांतील उत्तमोत्तम चार श्लोक याच उताऱ्यांत आहेत.

सख्यौः—अये, अनुपयुक्तभूषणोऽयं जनः । चित्रकर्मपरिचयेनाङ्गेषु त आभरणविनियोगं कुर्वः ।

शकुन्तलाः—जाने वां नैपुणम् ।

(उभे नाट्येनालंकुरुतः ।) (ततः प्रविशति स्नानोत्तीर्णः काश्यपः)

काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ १ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(इति परिक्रामति)

सख्यौः—हला शकुन्तले, अवसितमण्डनाऽसि । परिधत्स्व सांप्रतं क्षौमयुगलम् ।

(शकुन्तला उत्थाय परिधत्ते ।)

गौतमीः—जाते, एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः । आचारं तावत्प्रतिपद्यस्व ।

शकुन्तलाः—(सव्रीडम् ।) तात वन्दे ।

काश्यपः—वत्से,

ययातेरिव शार्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ २ ॥

गौतमीः—भगवन्, वरः खल्वेषः । नाशीः ।

काश्यपः—वत्से, इतः सद्यो हुताग्नीन्प्रदक्षिणीकुरुष्व ।

(सर्वे परिक्रामन्ति ।)

काश्यपः—(ऋक्छंदसाऽऽशास्ते ।)

अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥ ३ ॥

प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम् ।) क्व ते शार्ङ्गरवामिश्राः ।

(प्रविश्य ।)

शिष्याः—भगवन्, इमे स्मः ।

काश्यपः—भगिन्यास्ते मार्गमादेशय ।

शार्ङ्गरवः—इत इतो भवती ।

(सर्वे परिक्रामन्ति ।)

काश्यपः—भो भोः संनिहितास्तपोवनतरवः ।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ४ ॥

(कोकिलरवं सूचयित्वा ।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥ ५ ॥

(आकाशे)

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ ६ ॥

(सर्वे सविस्मयं आकर्णयन्ति ।)

गौतमीः—जाते, ज्ञातिजनस्निग्धाभिरनुज्ञातगमनाऽसि तपोवनदेवताभिः । प्रणम भगवतीः ।

शकुन्तलाः—(सप्रणामं परिक्रम्य । जनान्तिकम् ।) हला प्रियंवदे, आर्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

प्रियंवदाः—न केवलं तपोवनविहरकातरा सखी एव । त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते ।

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥ ७ ॥

शकुन्तलाः—(स्मृत्वा ।) तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये ।

काश्यपः—अवैमि ते तस्यां सोदर्यस्नेहम् । इयं तावद्दक्षिणेन ।

शकुन्तलाः—(उपेत्य लतामालिङ्ग्य ।) वनज्योत्स्ने, चूतसङ्गतापि मां प्रत्यालिङ्गेतोगताभिः शाखाबाहाभिः । अद्यप्रभृति दूरपरिवर्तिनी ते खलु भवामि ।

काश्यपः—संकल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च संप्रति वीतचिन्तः ॥ ८ ॥

इतः पन्थानं प्रतिपद्यस्व ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शकुन्तलाः—(सख्यौ प्रति ।) हला एषा द्वयोर्युवयोर्हस्ते निक्षेपः ।

सख्यौः—अयं जनः कस्य हस्ते समर्पितः । (इति बाष्पं विसृजतः ।)

काश्यपः—अनसूये, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला । (सर्वे परिक्रामन्ति ।)

शकुन्तलाः—तात, एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदाऽनघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ ।

काश्यपः—नेदं विस्मरिष्यामः ।

शकुन्तलाः—(गतिभङ्गं रूपयित्वा ।) को नु खल्वेष निवसने मे सज्जते । (इति परावर्तते)

काश्यपः—वत्से,

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ ९ ॥

शकुन्तलाः—वत्स, किं सहवासपरित्यागिनीं मामनुसरसि । अचिरप्रसूतया जनन्या विना वर्धित एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।

(इति रुदती प्रस्थिता ।)

काश्यपः—उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ १० ॥

शार्ङ्गरवः—भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम् । अत्र संदिश्य प्रतिगन्तुमर्हसि ।

काश्यपः—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः । (सर्वे परिक्रम्य स्थिताः ।)

काश्यपः—किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः संदेष्टव्यम् । (इति चिन्तयति ।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शकुन्तलाः—(जनान्तिकम् ।) हला पश्य । नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्यारटति दुष्करमहं करोमीति ।

अनुसूयाः—सखि, मैवं मन्त्रयस्व ।

एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वपि विरहदुःखमाशाबन्धः साहयति ॥ ११ ॥

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरवः—आज्ञापयतु भगवान् ।

काश्यपः—

अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ १२ ॥

शार्ङ्गरवः—गृहीतः संदेशः ।

काश्यपः—वत्से, त्वमिदानीमनुशासनीयाऽसि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् ।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

काश्यपः—सा त्वमितः पतिकुलं प्राप्य

शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ १३ ॥

गौतमीः—एतावान्वधूजनस्योपदेशः । जाते, एतत्खलु सर्वमवधारय ।

काश्यपः—वत्से, परिष्वजस्व मां सखीजनं च ।

शकुन्तलाः—तात, इत एव किं प्रियंवदानुसूये सख्यौ निवर्तयिष्येते ।

काश्यपः—वत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शकुन्तलाः—(पितरमाश्लिष्य ।) कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ।

काश्यपः—वत्से, किमेवं कातराऽसि ।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
द्विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ १४ ॥

(शकुन्तला पितुः पादयोः पतति ।)

काश्यपः—यदिच्छामि तें तदस्तु ।

शकुन्तलाः—(सख्यावुपेत्य ।) हला द्वे अपि मां सममेव परिष्वजेथाम् ।

सख्यौः—(तथा कृत्वा ।) सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्ततस्तस्मायिदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय ।

शकुन्तलाः—अनेन सन्देहेन वामाकम्पितास्मि ।

सख्यौः—मा भैषीः । अतिस्नेहः पापशङ्की ।

शार्ङ्गरवः—युगान्तरमारूढः सविता । त्वरतामत्रभवती ।

शकुन्तलाः—(आश्रमाभिमुखी स्थित्वा ।) तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

काश्यपः—श्रूयताम् ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ १५ ॥

गौतमीः—जाते, परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषैव मन्त्रयिष्यते । निवर्ततां भवान् ।

काश्यपः—वत्से, उपरुध्यते तपोनुष्ठानम् ।

शकुन्तलाः—(भूयः पितरमाश्लिष्य ।) तपश्चरणपीडितं तातशरीरम् । तन्माऽतिमात्रं मम कृत उत्कण्ठस्व ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काश्यपः—(सनिश्वासम् ।)

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥ १६ ॥

गच्छ । शिवास्ते पन्थानः सन्तुः ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च ।)

शाकुन्तलम् ।

अभ्यासः – १ ओळखाः—चिरयसि, आदधाना, शेरते । २ प्रयोग बदलाः—निशाचराः निजपदात् भ्रश्यन्तु । आवर्जितानि मया सकलसामाजिकानां मनांसि । ३ वाक्यांत योजाः—अभितः, अधि+वस्, यावत् ।

४२ दारिद्र्यदुःखम् ।

परिचयः—मृच्छकटिक हें नाटक शूद्रक कवीनें रचिलें आहे. हें सामाजिक नाटक आहे.

संदर्भः—चारुदत्त हा मृच्छकटिकांतील नायक. त्याच्या अंगीं कांहीं असामान्य गुण होते. तो गर्भश्रीमंत होता, पण दानधर्म केल्यामुळें त्यास दारिद्र्य प्राप्त झालें होतें. दारिद्र्याचीं दुःखें या उताऱ्यांत वर्णिलीं आहेत.

चारुदत्तः—(ऊर्ध्वमवलोक्य सनिर्वेदं निःश्वस्य ।)

यासां बलिः सपदि मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
ताश्चेव संप्रति विरूढतृणाङ्कुरासु
बीजाञ्जलिः पतति कीटमुखावलीढः ॥ १ ॥

(इति मन्दं मन्दं परिक्रम्योपविष्टः ।)

विदूषकः—एष आर्यचारुदत्तः । तद्यावत्सांप्रतमुपसर्पामि । (उपसृत्य) स्वस्ति भवते । वर्धतां भवान् ।

चारुदत्तः—अये, सर्वकालमित्रं मैत्रेयः प्राप्तः । सखे, स्वागतम् । आस्यताम् ।

विदूषकः—यद्भवानाज्ञापयति । भो वयस्य, एष ते प्रियवयस्येन चूर्णवृद्धेन जातिकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्य आर्यचारुदत्तस्य त्वयोपनेतव्य इति । (समर्पयति ।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चारुदत्तः -(गृहीत्वा सचिन्तः स्थितः ।)

विदूषकः—भो, इदं किं चिन्त्यते ।

चारुदत्तः—वयस्य,

सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ॥ २ ॥

विदूषकः—भो वयस्य, मरणाद्दारिद्र्याद्वा कतरत्ते रोचते ।

चारुदत्तः—वयस्य,

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥ ३ ॥

विदूषकः—भो वयस्य, अलं संतापितेन । प्रणयिजनसंक्रामित-विभवस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीयः ।

चारुदत्तः—वयस्य, न ममार्थान्प्रति दैन्यम् । पश्य

एतत्तु मां दहति यद् गृहमस्मदीयं
क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः
कालात्यये मधुकराः करिणः कपोलम् ॥ ४ ॥

विदूषकः—भो वयस्य, एते खलु दास्याः पुत्रा अर्थकल्यवर्ता वरटा-भीता इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति ।

चारुदत्तः—वयस्य,

सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥ ५ ॥

अपि च ।

दारिद्र्याद्ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ ६ ॥

विदूषकः—भो वयस्य, तमेवार्थकल्यं स्मृत्वा अलं संतापितेन ।

चारुदत्तः—वयस्य, दारिद्र्यं हि पुरुषस्य

निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम् ।
वनं गन्तुं बुद्धिर्भवति च कलात्रात्परिभवो
हृदिस्थः शोकाग्निर्न च दहति संतापयति च ॥ ७ ॥

तद्वयस्य, कुतो मया गृहदेवताभ्यो बलिः । गच्छं त्वमपि चतुष्पथे मातृभ्यो बलिमुपहार ।

विदूषकः—न गमिष्यामि ।

चारुदत्तः—किमर्थम् ।

विदूषकः—यत एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति । तत्को गुणो देवेष्वर्चितेषु ।

चारुदत्तः—वयस्य, मा मैवम् । गृहस्थस्य नित्योऽयं विधिः ।

तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः ।
तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः ॥ ८ ॥

तद्गच्छ मातृभ्यो बलिमुपहर ।

विदूषकः—भो न गमिष्यामि । अन्यः कोऽपि प्रयुज्यताम् । मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति आदर्शगता इव छाया वामतो दक्षिणा दक्षिणतो वामा । अन्यच्च । एतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेटाश्च राजवल्लभाः संचरन्ति । तस्मात् मण्डूकलुब्धसर्पेव कालसर्पस्य मूषिक इवाभिमुखापतितो वध्य इदानीं भविष्यामि । त्वमिहोपविष्टः किं करिष्यसि ।

चारुदत्तः—भवतु, तिष्ठ तावदहं समाधिं निर्वर्तयामि ।

मृच्छकटिकम् ।

अभ्यासः—१ समास-पर्णच्छायम्. षाण्मातुरः, स्नातानुलिप्तः । २ वाक्यांत योजा-अथ, इति, रुच्. ३ प्रयोजक करा—माणवकः धर्मं बोधति । भृत्यः भारं वहति.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४३ अश्वहरणम् ।

संदर्भः—रामचंद्रानीं अश्वमेध यज्ञ करण्याचें ठरवून पृथ्वीसंचाराकरितां घोडा सोडला. त्याच्या रक्षणार्थं मोठें सैन्य धाडलें होतें. सैन्याचा सेनापति लक्ष्मणाचा मुलगा होता. तो यज्ञांतील घोडा वाल्मीकि ऋषीच्या आश्रमांत राहणाऱ्या लवानें पकडून नेला. लव हा रामाचा मुलगा होता.

(प्रविश्य)

संभ्रान्ता वटवः—कुमार, कुमार, अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते । सोऽयमधुनाऽस्माभिः प्रत्यक्षीकृतः ।

लवः—अश्व इति पशुसमाम्नाये साङ्ग्रामिके च पठ्यते । तद्ब्रूत कीदृशः ।

वटवः—श्रूयताम् ।

पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं वाऽऽख्यातैर्व्रजति स पुनर्दूरमेह्येति यामः ॥ १ ॥

(इत्यजिने हस्तयोश्चाकर्षन्ति) पश्यतु कुमारस्तदाश्चर्यम् ।

लवः—दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

वटवः—कथं ज्ञायते ।

लवः—ननु मूर्खाः, पठितमेव युष्माभिरपि तत्काण्डम् । किं न पश्यथ प्रत्येकं शतसंख्याः कवचिनो दण्डधारिणो निषङ्गधारिणश्च रक्षितारः, तत्प्रायमेव बलमिदं दृश्यते । यदीह न प्रत्ययस्तद्गत्वा पृच्छत ।

वटवः—भोः भोः किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति ।

लवः—(सस्पृहमात्मगतम्) अये, अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः ।

(नेपथ्ये ।)

योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २ ॥

लवः—(सगर्वमिव ।) अहो सन्दीपनान्यक्षराणि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वटवः—किमुच्यते । प्राज्ञः खलु कुमारः ।

लवः—भोः भोः, तत्किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते ।

(नेपथ्ये ।)

रे रे महाराजं प्रति कुतः क्षत्रियाः ।

लवः—धिग्जाल्मान् ।

यदि ते सन्ति सन्त्येव केयमद्य विभीषिका ।
किमुक्तैरेभिरधुना तां पताकां हरामि वः ॥ ३ ॥

भो भो वटवः, परिवृत्य लौष्टैरभिघ्नन्तो नयतैनमश्वम् । एष रोहितानां मध्ये वराकश्चरतु ।

(प्रविश्य सक्रोधदर्पः ।)

पुरुषः—धिक् चापलं, किमुक्तवानसि । तीक्ष्णतरा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः । सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

वटवः—कुमार, कृतमनेनाश्वेन । तर्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः दूरे चाश्रमपदमितः तदेहि हरिणप्लुतैः पलायामहे ।

लवः—किं नाम विस्फुरन्ति शस्त्राणि । (इति धनुरारोपयन्) एतेषामायुधीयानां शस्त्राविष्कारः मम चापस्य पुरतः कियान् । क्षणादेव स्मृतिमात्रावशेषं करोमि ।

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

उत्तररामचरितम् ।

अभ्यासः—१ संधि करा—भगवन्+असौ+आगतः । तान्+चौरान्+जहि । २ वाक्यांत योजा—उत्सुक, प्रभृति, क्लृप्. ३ शब्द चालवा—मघवन्, पथिन्, धी.

४४ वैराग्यगुणाः ।

परिचयः—शतकत्रय नांवाचा काव्यात्मक ग्रंथ राजा भर्तृहरीनें लिहिला आहे. त्याचे तीन भाग आहेत—नीतिशतक, शृङ्गारशतक व वैराग्यशतक जगाचा अनुभव घेऊन काव्य लिहिल्यामुळें शतकत्रय हा मुखोद्गत करण्यासारखा ग्रंथ झाला आहे.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अवोधोपहताश्चान्ये जीर्णमङ्गेषु भाषितम् ॥ १ ॥
न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ २ ॥

भोगा न भुक्ता वयमेव भुक्ता—
स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याता—
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ३ ॥

भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं च जीर्णशतखण्डमयी च कन्था
हा हा तथापि विषया न परित्यजन्ति ॥ ४ ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ॥ ५ ॥
विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना—
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सुघृतं पयोदधियुतं भुञ्जन्ति ये मानवा—
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरम् ॥ ६ ॥

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः
कण्डूयन्ते जरठहरिणाः शृङ्गमङ्गे मदीये ॥ ७ ॥

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्मी-
सम इह परितोषो निर्विशेषो विशेषः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ ८ ॥
क्वचिद्वीणावादः क्वचिदपि च हाहेति रुदितं
क्वचिन्नारी रम्या क्वचिदपि जराजर्जरवपुः ।
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहो
न जाने संसारः किममृतमयः किं विषमयः ॥ ९ ॥
भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥१०॥

वैराग्यशतकम् ।

अभ्यासः—१ ओळखा—अनुष्ठीयताम्, आतस्थुषा, अदर्शि, मूर्च्छति, २ प्रयोग बदला—निर्जने वने किं निमित्तं रुद्यते त्वया । अधर्मो धर्मतामेति । ३ वाक्यांत योजा—परितः, वि+रम्, तावत्.

४५ वाग्युद्धम् ।

परिचयः—वेणीसंहार हें वीररसप्रधान नाटक भट्ट नारायण कवीनें लिहिलें आहे. त्याची भाषा तेजस्वी व फार जोरदार आहे.

संदर्भः—सेनापती द्रोणाचार्य मारले गेल्यावर राजा दुर्योधन वगैरे मुत्सद्दी विचार करीत बसले. द्रोणाचार्यांच्या मृत्यूची कारणमीमांसा करीत असतांच अश्वत्थामा व कृपाचार्य आले. कृपाचार्यांनीं अश्वत्थाम्यास सेनापति करावा असें सुचविलें. त्या वेळीं कर्णाचा व अश्वत्थाम्याचा मोठा तंटा झाला व शेवटीं ते अगदीं हातघाईवर आले.

(ततः प्रविशतः कर्णदुर्योधनावासनस्थौ ।)

दुर्योधनः—अङ्गराज,

तेजस्वी रिपुहतबन्धुदुःखपारं
बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम् ।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत् ॥ १ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथवा सूक्तमिदमभियुक्तैः प्रकृतिर्दुस्त्यजेति । यतः शोकान्धचेतसा तेन विमुच्य क्षत्रधर्मकार्कश्यं द्विजातिसुलभो मार्दवपरिग्रहः कृतः ।

कर्णः—राजन्कौरवेश्वर, न खल्विदमेवम् ।

दुर्योधनः—कथं तर्हि ।

कर्णः—एवं किल द्रोणस्याभिप्राय आसीद्यथाऽश्वत्थामा मया पृथिवीराज्येऽभिषेक्तव्य इति । तस्याभावाद्वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहणमिति तथा कृतवान् ।

दुर्योधनः—(सशिरःकम्पम्) एवमिदम् ।

कर्णः—एतदर्थं च कौरवपाण्डवपक्षपातप्रवृत्तमहासंग्रामस्य राजकस्य परस्परक्षयमुपेक्षमाणेन तेन प्रधानपुरुषवध उपेक्षा कृता ।

दुर्योधनः—उपपन्नमिदम् ।

कर्णः—अन्यच्च राजन्, द्रुपदेनाप्यस्य बाल्यात्प्रभृत्यभिप्रायवेदिना स्वराष्ट्रे वासो न दत्तः ।

दुर्योधनः—साधु अङ्गराज, साधु । निपुणमभिहितम् ।

कर्णः—न चायं ममैकस्याभिप्रायः । अन्येऽभियुक्ता अपि नैवेदमन्यथा मन्यन्ते ।

दुर्योधनः—एवमेतत् । कः सन्देहः ।

दत्ताभयं सोऽतिरथो वध्यमानं किरीटिना ।
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥ २ ॥

(तत उपसर्पतः कृपाश्वत्थामानौ)

दुर्योधनः—(दृष्ट्वा) अये, कथं कृपोश्वत्थामा च । (आसनादवतीर्य) गुरो, अभिवादये । (अश्वत्थामानं प्रति) आचार्यपुत्र, एहि परिष्वजस्व माम् । (आलिङ्ग्य पार्श्व उपवेशयति । अश्वत्थामा बाष्पमुत्सृजति ।)

कर्णः—द्रौणायने, अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम् ।

दुर्योधनः—आचार्यपुत्र, को विशेष आवयोरस्मिन् व्यसनार्णवे । पश्य

तातस्तव प्रणयवान्स पितुः सखा मे
शस्त्रे यथा तव गुरुः स तथा ममापि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद्गुरुशुचा मनसा त्वमेव ॥ ३ ॥

अश्वत्थामाः—राजन्नेवं पक्षपातिनि त्वयि युक्तमेव शोकभारो लघूकर्तुम् । किन्तु

मयि जीवति मत्तातः केशग्रहमवाप्तवान् ।
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम् ॥ ४ ॥

कर्णः—द्रौणायने, किमत्र क्रियते यदा तेनैव सर्वपरिभवत्राणहेतुना शस्त्रमुत्सृजतैतादृशीमवस्थामात्मा नीतः ।

अश्वत्थामाः—अङ्गराज, किमाह भवान् । किमत्र क्रियत इति । श्रूयतां यत्क्रियते ।

यो यः शस्त्रं बिभर्ति स्वभुजगुरुबलः पाण्डवीनां चमूनां
यो यः पांचालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥५॥

दुर्योधनः—आचार्यपुत्र, तस्य तथाविधस्यानन्यसाधारणस्य ते वीरभावस्य किमन्यत्सदृशम् ।

कृपः—राजन्, सुमहान् खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभारः । तदहमेवं मन्ये । भवता कृतपरिकरोऽयमुच्छेत्तुं लोकत्रयमपि समर्थः । किं पुनर्युधिष्ठिरबलम् । अतोऽभिषिच्यतां सैनापत्ये ।

दुर्योधनः—सुष्ठु युज्यमानमिहितं युष्माभिः । किं तु प्राक्प्रतिपन्नोऽयमर्थोऽङ्गराजस्य ।

कृपः—राजन्, असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम् । अस्यापि च तदेवारिकुलमनुशासनीयम् । अतः किमस्य पीडा न भविष्यति ।

अश्वत्थामाः—राजन् कौरवेश्वर, किमद्यापि युक्तायुक्तविचारणया ।

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा—
मकेशवमपाण्डवं भुवनमद्य निःसोमकम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इयं परिसमाप्यते रणकथाऽद्य दोःशालिना
व्यपैतु नृपकाननातिगुरुरद्य भारो भुवः ॥ ६ ॥

कर्णः—द्रोणात्मज, वक्तुं सुकरमिदमध्यवसितुं दुष्करम् । बहवः कौरवबलेऽस्य कर्मणः शक्ताः ।

अश्वः—अङ्गराज, एवम् । बहवः कौरवबले शक्ताः । किं तु दुःखोपहतः शोकावेगाद्ब्रवीमि । न पुनर्वीरजनाधिक्षेपेण ।

कर्णः—मूढ, दुःखितस्याश्रुपातः । कुपितस्य चायुधद्वितीयस्य सङ्ग्रामावतरणमुचितम् । नैवंविधाः प्रलापाः ।

अश्वः—(सक्रोधम्) अरेरे राधागर्भभारभूत, सूतापसद, किमेवमाक्षिपसि ।

कर्णः—

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ॥ ७ ॥

अश्वः—किमाह भवान् । ममापि नाम अश्वत्थाम्नो दुःखितस्याश्रुभिः प्रतिक्रियामुपदिशसि । न शस्त्रेण ।

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं
संप्रत्येव भयाद्विहाय समरं प्राप्तोऽसि किं त्वं यथा ।
जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण किम् ॥ ८ ॥

कर्णः—अरेरे वाचाट, वृथाशस्त्रग्रहणदुर्विदग्ध बटो,

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम् ।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना ॥ ९ ॥

अश्वः—(सक्रोधम्) अरे रथकारकुलकलङ्क, आयुधानभिज्ञ, तातमप्यधिक्षिपसि । अथवा

स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाजौ प्रतिदिनमियं वेत्ति वसुधा ।
परित्यक्तं शस्त्रं कथमिति स सत्यव्रतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो क्व नु तदा ॥ १० ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्णः—(विहस्य) एवं भीरुरहम्। त्वं पुनर्विक्रमैकरसः। तव पितरमनुस्मृत्य महान्मेसंशयो जातः। अपि च रे मूढ,

यदि शस्त्रमुज्झितमशस्त्रपाणयो
न निवारयन्ति किमरीनुदायुधान्।
यदनेन मौलिदलनेप्युदासितं
सुचिरं स्त्रियेव नृपचक्रसंनिधौ ॥ ११ ॥

अश्व०:—(सक्रोधं सकम्पं च) दुरात्मन्, राजवल्लभप्रगल्भ, असंबद्धप्रलापिन्,

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य।
तव भुजबलदर्पध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम् ॥ १२ ॥

(इति तथा कर्तुमुत्तिष्ठति)

कृपदुर्योधनौः—गुरुपुत्र, मर्षय मर्षय। (इति वारयतः)

(अश्वत्थामा चरणप्रहारं नाटयति)

कर्णः—(सक्रोधमुत्थाय खड्गमाकृष्य) अरे दुरात्मन्, ब्रह्मबन्धो, आत्मश्लाघिन्,

जात्या काममवध्योऽसि चरणं त्विदमुद्धृतम्।
अनेन लूनं खड्गेन पतितं वेत्स्यसि क्षितौ ॥ १३ ॥

अश्व०—अरे मूढ, जात्या चेदवध्योऽहमियं सा जातिः परित्यक्ता। (इति यज्ञोपवीतं छिनत्ति)

अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया।
शस्त्रं ग्रहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥ १४ ॥

(उभावपि खड्गमाकृष्यन्योन्यं प्रहर्तुमुद्यतौ)

दुर्योधनः—आचार्यपुत्र शस्त्रग्रहणेनालम्।

कृपः—वत्स सूतपुत्र, शस्त्रग्रहणेनालम्।

अश्व:—मातुल, मातुल, किं निवारयसि। अयमपि तातनिन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्णः—राजन्न खल्वहं निवारयितव्यः ।

उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया ।
अत्रासितानां कोधान्धैर्भवत्येषा विकत्थना ॥ १५ ॥

दुर्योधनः—कर्ण, गुरुपुत्र, कोऽयमद्य युवयोर्व्यामोहः ।

कृपः—वत्स, अन्यदेव प्रस्तुतमन्यत्रावेग इति कोऽयं व्यामोहः । स्वबलव्यसनं चेदमस्मिन्काले राजकुलस्यास्य युष्मत्त एव भवतीति वामः पन्थाः ।

अश्व०:—मातुल, न लभ्यतेऽस्य कटुप्रलपिनो रथकारकुलकलंकस्य दर्पः शादयितुम् ।

कृपः—वत्स, अकालः खलु स्वबलप्रधानविरोधस्य ।

अश्व०:—मातुल, यद्येवम् ।

अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत्प्रियमपि मयास्त्रं रणमुखे ।
बलानां नाथेऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राजा प्रियसखममुं वेत्तु समरे ॥ १६ ॥

(इति खड्गं उत्सृजति)

कर्णः—(विहस्य) कुलक्रमागतमेवैतद्भवादृशां यदस्त्रपरित्यागो नाम ।

अश्वत्थामाः—ननु रे, अपरित्यक्तमपि भवादृशैरायुधं चिरपरित्यक्तमेव निष्फलत्वात् ।

कर्णः—अरे मूढ,

धृतायुधो यावदहं तावदन्यैः किमायुधैः
यद्धा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति ॥ १७ ॥

वेणीसंहारम् ।

अभ्यासः—१ प्रयोग बदला—श्येनेनापि चेतनां लब्ध्वा मुनिरुक्तः । काक्या कृष्णासर्पो निपातितः । २ ओळखा—पथि, उशन, अद्राक्षीत्. ३ वाक्यांत योजा—क्त-क्त, प्र+भू, आत्मन्. ४ ग्रहण—वक्तुं सुकरम् अध्यवसितुं दुष्करम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४६ अजविलापः ।

संदर्भः—रघुवंशांतील रघुराजाचा मुलगा अज. त्याचें इंदुमतीशीं स्वयंवर झालें. राज्याची व्यवस्था उत्तम प्रकारें ठेऊन अज राजा इन्दुमतीसह ऐश्वर्यसुखाचा उपभोग घेत असतां नारदांच्या वीणेवरील स्वर्गीय पुष्पमाला इंदुमतीच्या अंगावर पडली व तिचा अंत झाला. इन्दुमती ही शापभ्रष्ट अप्सरा होती.

विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ १ ॥
कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥ २ ॥
अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥ ३ ॥
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥ ४ ॥
अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥ ५ ॥
कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ॥ ६ ॥
ध्रुवमस्मि शठः शुचिस्मिते विदितः कैतववत्सलस्तव ।
परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ॥ ७ ॥
दयितां यदि तावदन्वगाद्विनिवृत्तं किमिदं तया विना ।
सहतां हतजीवितं मम प्रवलामात्मकृतेन वेदनाम् ॥ ८ ॥
मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिवन्धना रतिः ॥ ९ ॥
कुसुमोत्खचितान्वलीभृतश्चलयन्भृङ्गरुचस्तवालकान् ।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ॥ १० ॥
तदपोहितुमर्हसि प्रिये प्रतिवोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥ ११ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम् ।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनम् ॥ १२ ॥
शनिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम् ।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ॥ १३ ॥
नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥ १४ ॥
इदमप्रतिबोधशायिनीं रशना त्वां प्रथमा रहःसखी ।
गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ॥ १५ ॥
मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतम् ॥ १६ ॥
कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम् ॥ १७ ॥
स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ॥ १८ ॥
तव निश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया ।
असमाप्य विलासमेखलां किमिदं किन्नरकण्ठि सुप्यते ॥ १९ ॥
समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः ।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ २० ॥
गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥ २१ ॥
मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे ।
अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिम् ॥ २२ ॥
विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥ २३ ॥
विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ॥ २४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः—१ प्रयोग बदला—कृतयुगे स धर्म आसीत्। क्षत्रियेण लोभमाश्रितः क्षत्रियो हन्तव्यः। २ वाक्यांत योजा—कश्चित्, नाम· ३ ओळखा—चिरायते, ईप्सति, यियासुः

४७ मातङ्गकथा।

संदर्भः—राजवाहन हा दशकुमारांपैकीं प्रमुख राजपुत्र. त्याची एका मातंगाशीं गांठ पडली. मातंगानें आपली हकीकत सांगितली व एका महत्त्वाच्या कामांत राजवाहनाची मदत मागितली. ती देण्याकरितां राजवाहन गेला असतां इतर कुमार त्याचा शोध करण्याकरितां निघाले:

राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन् कंचिद्देशमतिक्रम्य विन्ध्याटवीमध्यमविशत्। तत्र हेतिहतिकिणाङ्कं लोहकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं कमपि पुरुषं ददर्श। तेन विहितपूजनो राजवाहनोऽभापत। 'ननु मानव, जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति। भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति। हेतिहतिभिः किरातरीतिरनुमीयते। कथय किमेतत् इति। 'तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवति' इति मत्वा स पुरुषस्तद्वयस्यमुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत्। 'राजनन्दन, केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय, निजकुलाचारं दूरीकृत्य, सत्यशौचादिधर्मव्रातं परिहृत्य, किल्बिषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणद्रुवा निवसन्ति। तेषु कस्यचित् पुत्रो निन्दापात्रचारित्रो मातङ्गो नामाहं सह किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीयाटव्यां बन्धने निधाय तेषां सकलधनमपहरन्वीतदयो व्यचरम्।

कदाचिदेकस्मिन्कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयान्वितचित्तोऽब्रवम्। 'ननु पापाः, न हन्तव्यो ब्राह्मणः' इति। ते रोषारुणनयना मां बहुधा निरभर्त्सयन्। तेषां भाषणपारुष्यमसहिष्णुरहमवनिसुररक्षणाय चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम्। ततः प्रेतपुरीं प्राप्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शमनं विलोक्य तस्मै दण्डप्रणाममकरवम् । सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजामात्यमाहूय तमवोचत् । 'सचिव, नैषोऽमुष्य मृत्युसमयः । निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत् । इतः प्रभृति विगतकल्मषस्यास्य पुण्यकर्मकरणे रुचिरुदेष्यति । पापिष्ठैरनुभूयमानं यातनाविशेषमत्र विलोक्य पुनरपि पूर्वशरीरमनेन गम्यताम् इति । चित्रगुप्तोऽपि तत्र तत्र संतप्तेषु लोहस्तम्भेषु वध्यमानान्, अत्युष्णीकृते विततशरावे तैले निक्षिप्यमाणान्, लगुडैर्जर्जरीकृतावयवान् दर्शयित्वा पुण्यबुद्धिमुपदिश्य माममुञ्चत् ।

तदैव पूर्वशरीरमहं प्राप्तो महाटवीमध्ये शीतलोपचारं रचयता महीसुरेण परीक्ष्यमाणः शिलायां शयितः क्षणमतिष्ठम् । तदनु विदितोदन्तो मदीयवंशबन्धुगणः सहसाऽगत्य मन्दिरमानीय मामपक्रान्तव्रणमकरोत् । द्विजन्मा कृतज्ञो मह्यमक्षरशिक्षां विधाय कल्मषक्षयकारणं सदाचारमुपदिश्य शशिखण्डशेखरस्य पूजाविधानमभिधाय मत्कृतां पूजामङ्गीकृत्य निरगात् । तदारभ्याहं किरातसंसर्गं बन्धुकुलवर्गमुत्सृज्य सकललोकैकगुरुमिन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने दूरीकृतकलङ्को वसामि ।

पुनरपि स मातङ्गोऽवादीत् । 'देव, भवते विज्ञापनीयं रहस्यं किञ्चिदस्ति । आगम्यताम्' इति । स वयस्यगणादपनीय रहसि पुनरेनमभाषत । 'राजन्, अतीते निशान्ते गौरीपतिः स्वप्नसंनिहितो निद्रामुद्रितलोचनं विबोध्य प्रसन्नवदनकान्तिः प्रश्रयानतं मामवोचत् । 'मातङ्ग, दण्डकारण्यान्तरालगामिन्यास्तटिन्यास्तीरभूमौ स्फटिकलिङ्गस्य पश्चादद्रिपतिकन्यापदपङ्क्तिचिह्नितस्याश्मनः सविधे विधेराननमिव किमपि बिलं विद्यते । तत्प्रविश्य तत्र निक्षिप्तं ताम्रशासनं, शासनं विधातुरिव समादाय, विधिं तदुपदिष्टं दिष्टविजयमिव विधाय, पाताललोकाधीश्वरेण भवता भवितव्यम् । भवत्साहाय्यकारी राजकुमारोऽद्य श्वो वा समागमिष्यति' इति । तदादेशानुगुणमेव भवदागमनमभूत् । साधनाभिलाषिणो मम रचय साहाय्यम् इति । 'तथा' इति राजवाहनः सार्कं मातङ्गेन नमितोत्तमाङ्गेन, विहायार्धरात्रे निद्रापरतन्त्रं मित्रगणं, वनान्तरमवाप । तदनु तदनुचराः कल्ये साकल्येन राजकुमारमनवलोकयन्तो विपण्णहृदयास्तेषु तेषु वनेषु सम्य-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गन्विष्य तदन्वेषणमनीषया देशान्तरं चरिष्णवोऽतिसहिष्णवो निश्चितपुनः-संगमसंकेतस्थानाः परस्परं वियुज्य ययुः ।

दशकुमारचरितम् ।

अभ्यासः—१ समास—गृहीतप्रतिमुक्तः, निर्जनम्, अनुरूपम् । २ ओळखा—उद्घाट्य, व्यरंसीत्, जिज्ञासुः । ३ संधि करा—अस्तौत्+हरिः, पुनः+रक्षितः

---

४८ सीतात्यागः ।

संदर्भः—राम व सीता बोलत असतांनाच सीतेस झोंप लागली. इतक्यांत एक हेर येऊन त्यानें सीतेवद्दलचा जनप्रवाद रामास सांगितला. तो खोटा आहे हें माहीत असूनही केवळ प्रजेच्या हिताकरितां रामानें सीतेचा, ती झोंपेंत असतांनाच, त्याग केला.

सीताः—प्रियंवद, एहि । संविशावः । (इति शयनाय समन्ततो निरूपयति ।)

रामः—अयि, किमन्वेष्टव्यम् ।

आविवाहसमयाद्गृहे वने शैशवे तदनु यौवने पुनः ।
त्वापहेतुरनुपाश्रितोऽन्यया रामवाह्नुरुपधानमेष ते ॥ १ ॥

सीताः—(निद्रां नाटयन्ती) अस्त्येतदार्यपुत्र, अस्त्येतत् । (इति स्वपिति ।)

रामः—कथं प्रियवचना मे वक्षसि प्रसुप्तैव । (निर्वर्ण्य ।)

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ २ ॥

(प्रविश्य ।)

प्रतिहारीः—देव, उपस्थितः ।

रामः—अयि कः ।

प्रतिहारीः—आसन्नपरिचारको देवस्य दुर्मुखः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रामः—शुद्धान्तचारी दुर्मुखः। स मया पौरजानपदेष्वपसर्पः प्रहितः। (प्रकाशम्) आगच्छतु।

(प्रतिहारी निष्क्रान्ता)

(प्रविश्य)

दुर्मुखः—(स्वगतम्।) हा कथमिदानीं देवीमन्तरेण ईदृशमचिन्तनीयं जनापवादं देवाय कथयिष्यामि। अथवा नियोगः खल्वीदृशो मे मन्दभाग्यस्य।

सीताः—(उत्स्वप्नायते।) हा आर्यपुत्र कुत्रासि।

रामः—अये, सैवेयं रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्वेगं करोति। (सस्नेहमङ्कमस्याः परामृशन्)

दुर्मुखः—जयतु देवः।

रामः—ब्रूहि यदुपलब्धम्।

दुर्मुखः—उपस्तुवन्ति देवं पौरजानपदा विस्मारिता वयं महाराजं दशरथं रामभद्रेणेति।

रामः—अर्थवाद एषः। दोषं तु मे कंचित्कथय येन स प्रतिविधीयते।

दुर्मुखः—(साध्वसम्।) शृणोतु देवः। (कर्णे) एवमिव।

रामः—अहह तीव्रसंवेगो वाग्वज्रः (इति मूर्च्छति।)

दुर्मुखः—आश्वसितु देवः।

रामः—(आश्वस्य।)

हा हा धिक्प्ररूढवासदूषणं य-
द्वैदेह्याःप्रशमितमद्भुतैरुपायैः।
एतत्तत्पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् ॥ ३ ॥

तत्किमत्र मन्दभाग्यः करोमि। (विमृश्य सकरुणम्।) अथवा किमन्यत्।

सतां केनापि कार्येण लोकस्याराधनं व्रतम्।
यत्पूरितं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४ ॥

संप्रत्येव च भगवता वसिष्ठेन संदिष्टम्। अपि च।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यत्सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात्कश्मला किंवदन्ती
स्याच्चेदस्मिन्हन्त धिङ्मामधन्यम् ॥ ५ ॥

हा देवि देवयजनसम्भवे, हा स्वजन्मानुग्रहपवित्रितवसुन्धरे, हा राममय-जीविते, हा महारण्यवासप्रियसखि, हा तातप्रिये, कथमेवंविधायास्तवायमीदृशः परिणामः ।

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ६ ॥

(दुर्मुखं प्रति ।) दुर्मुख, ब्रूहि लक्ष्मणम् । एष ते नूतनो राजा रामः समाज्ञापयति । (कर्णे ।) एवमेवम् । इति ।

दुर्मुखः—हा कथमिदानीमग्निपरिशुद्धायै गर्भस्थितपवित्रसन्तानायै देव्यै दुर्जनवचनादेवमनार्यमध्यवसितं देवेन ।

रामः—शान्तम् । कथं दुर्जनाः पौरजानपदाः ।

इक्ष्वाकुवंशोऽभिमतः प्रजानां
जातं च दैवाद्वचनीयबीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्यदि दूरवृत्तम् ॥ ७ ॥

तद्गच्छ ।

दुर्मुखः—हा देवि । (इति निष्क्रान्तः ।)

रामः—हा कष्टम् । अतिबीभत्सकर्मा नृशंसोस्मि संवृत्तः ।

शैशवात्प्रभृति पोषितां प्रियां
सौहृदादपृथगाशयामिमाम् ।
छद्मना परिददामि मृत्यवे
सौनिको गृहशकुन्तिकामिव ॥ ८ ॥

तत्किमस्पर्शनीयः पातकी देवीं दूषयामि । (इति सीतायाः शिरः स्वैरमुन्नमय्य बाहुमाकर्षन् ।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥ ९ ॥

(उत्थाय ।) हन्त विपर्यस्तः संप्रति जीवलोकः । अद्यावसितं जीवितप्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्टप्रायं शरीरम् । अशरणोऽस्मि । किं करोमि । का गतिः । अथवा

दुःखसंवेदनायैव रामे चैतन्यमाहितम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि ॥ १० ॥

हा अम्ब अरुंधति । हा भगवन्तौ वसिष्ठविश्वामित्रौ । हा भगवन्पावक । हा देवि भूतधात्रि । हा तात जनक । हा तात । हा मातरः । हा प्रियसख सुग्रीव । हा सौम्य हनुमन् । हा परमोपकारिन् लङ्काधिपते विभीषण । दूषिताः स्थ । परिभूताः स्थ रामहतकेन । अथवा को नामाहमेतेषामाह्वाने ।

तेहि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ११ ॥

योऽहम्

विस्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वीं
क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि ॥ १२ ॥

(सीतायाः पादौ शिरसि कृत्वा) देवि, देवि, अयं पश्चिमस्ते रामशिरसा पादपङ्कजस्पर्शः । (इति रोदिति ।)

(नेपथ्ये)

अब्रह्मण्यमब्रह्मण्यम् ।

रामः—ज्ञायतां भोः किमेतत् ।

(पुनर्नेपथ्ये)

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमः शरण्यं त्वामुपस्थितः ॥ १३ ॥

रामः—आः कथमद्यापि राक्षसत्रासः । तद्यावदस्य दुरात्मनः कुंभीनसीपुत्रस्य समुन्मूलनाय शत्रुघ्नं प्रेषयामि । (कतिचित्पदानि गत्वा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुनर्निवृत्य ।) हा देवि, कथमेवंगता भविष्यसि । भगवति वसुन्धरे, सुश्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।

जनकानां रघुणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ १४ ॥

(इति रुदन्निष्क्रान्तः ।)

सीताः—हा सौम्य आर्यपुत्र, कुत्रासि । हा धिक् हा धिक् । दुस्सप्रणरणकविप्रलब्धाहमार्यपुत्रमाक्रन्दामि । (सर्वतोऽवलोक्य ।) हा धिक् हा धिक् । कथमेकाकिनीं मां प्रसुप्तमुज्झित्वा आर्यपुत्रो गतः । किमिदानीमेतत् । भवतु, तस्मै कोपिष्यामि यदि तं प्रेक्षमाणाऽऽत्मनः प्रभविष्यामि । कोऽत्र परिजनः ।

(प्रविश्य)

दुर्मुखः—देवि, कुमारलक्ष्मणो विज्ञापयति सज्जो रथः । आरोहतु देवीति ।

सीताः—इयमारोहामि । (उत्थाय परिक्रम्य ।) स्फुरति मे गर्भभारः । शनैर्गच्छावः ।

दुर्मुखः—इत इतो देवी ।

सीताः—नमस्तपोधनेभ्यो, नमो रघुकुलदेवताभ्यो, नम आर्यपुत्रचरणकमलेभ्यो, नमः सकलगुरुजनेभ्यः ।

(इति निष्क्रान्ताः सर्वे ।)

उत्तररामचरितम् ।

अभ्यासः—१ समास—यथाक्रमम्, अनुत्तमम्, गतासुकल्पा. २ भूत का० वा. धा. साधितें द्या.—नह्, लिह्, पच्, यज्. ३ परोक्षभूत. तृ. पु. ए. व. द्या—नि, ग्रह्, ब्रू, इ.

---

४९ सामान्यनीतिः ।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥ १ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ २ ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥ ३ ॥

साहित्यसंगीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमान-
स्तद्भागधेयं परमं पशूनाम् ॥ ४ ॥

शिरः शार्वं स्वर्गात्पतति शिरसस्तत्क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ५ ॥

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ६ ॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ७ ॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वे तु नैतादृशाः ।
केचिद्वृष्टिभिराद्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ९ ॥

एको देवः केशवो वा शिवो वा
ह्येकं मित्रं भूपतिर्वा यतिर्वा ।
एको वासः पत्तने वा वने वा
ह्येका भार्या सुन्दरी वा दरी वा ॥ १० ॥

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं
क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ ११ ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ १२ ॥

नेता यस्य वृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः ।
इत्यैश्वर्यबलान्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्युक्तं ननु दैवमेव शरणं धिग् धिग्वृथा पौरुषम् ॥ १३ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ १४ ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः खल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ १५ ॥

नीतिशतकम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः—१ ओळखा—प्रणमय्य, दुर्मनायते, अभ्यगात्. २ वाक्यांत योजा—अन्तरेण, काममू, स्निह्. ३ स्त्रीलिंगी रूपें द्या—इन्द्र, जग्मिवस्, पति.

५० शकुन्तलाप्रत्याख्यानम् ।

संदर्भः—कण्वमुनीचे शिष्य शकुंतलेला बरोबर घेऊन दुष्यन्त राजाकडे गेले असतां त्यांनीं राजास ऋषीचा निरोप सांगितला आणि शकुंतलेचें तुझ्याशीं लग्न झालेलें आहे, तेव्हां तिचा स्वीकार कर अशी विनंति केली. दुर्वास ऋषीच्या शापामुळें राजास या गोष्टीची आठवण राहिली नाहीं. त्यामुळें त्यानें शकुंतलेचा त्याग केला.

पुरोहितः—(राजानं निर्दिश्य ।) भो भोस्तपस्विनः, असावत्रभवान्वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति । पश्यतैनम् ।

शार्ङ्गरवः—भो महाब्राह्मण, काममेतदभिनन्दनीयं, तथापि वयमत्र मध्यस्थाः । कुतः ।

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ १ ॥

प्रतिहारीः—देव, प्रसन्नमुखवर्णा दृश्यन्ते । जानामि विश्रब्धकार्या ऋषयः ।

राजाः—(शकुन्तलां दृष्ट्वा ।) अथात्रभवती

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥ २ ॥

प्रतिहारीः—देव, न मे तर्कः प्रसरति । ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते ।

राजाः—भवतु । अनिर्वर्णनीयं परकलत्रम् ।

शकुन्तलाः—(हस्तमुरसि कृत्वा । आत्मगतम् ।) हृदय, किमेवं वेपसे । आर्यपुत्रस्य भावमवधार्य धीरं तावद्भव ।

पुरोहितः—(पुरो गत्वा) एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्यायसंदेशः । तं देवः श्रोतुमर्हति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—अवहितोऽस्मि ।

ऋषयः—(हस्तानुद्यम्य ।) विजयस्व राजन् ।

राजाः—सर्वानभिवादये ।

ऋषयः—इष्टेन युज्यस्व ।

राजाः—अपि निर्विघ्नतपसो मुनयः ।

ऋषयः—कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति धर्मांशौ कथमाविर्भविष्यति ॥ ३ ॥

राजाः—अर्थवान् खलु मे राजशब्दः । अथ भगवाँलोकानुग्रहाय कुशली कश्यपः ।

ऋषयः—स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकमिदमाह ।

राजाः—किमाज्ञापयति भगवान् ।

शार्ङ्गरवः—यन्मिथःसमयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः

त्वमर्हतां प्रागसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥ ४ ॥

तदिदानीमापन्नसत्त्वैयं प्रतिगृह्यतां सहधर्माचरणायेति ।

गौतमीः—आर्य, किमपि वक्तुकामासि । न मे वचनावसरोऽस्ति । कथमिति ।

नापेक्षितो गुरुजनोऽनया त्वया पृष्टो न बन्धुजनः ।
एकैकमेव चरिते भणामि किमेकैकम् ॥ ५ ॥

शकुन्तलाः—(आत्मगतम् ।) किं नु खल्वार्यपुत्रो भणति ।

राजाः—किमिदमुपन्यस्तम् ।

शकुन्तलाः—(आत्मगतम्) पावकः खलु वचनोपन्यासः ।

शार्ङ्गरवः—कथमिदं नाम । भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥ ६ ॥

राजाः—किमत्रभवती मया परिणीतपूर्वा ।

शकुन्तलाः—(सविषादम् । आत्मगतम्) हृदय, सांप्रतं त आशङ्का ।

शार्ङ्गरवः—किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा ।

राजाः—कुतोऽयमसत्कल्पनाप्रश्नः ।

शार्ङ्गरवः—मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥ ७ ॥

राजाः—विशेषेणाधिक्षिप्तोऽस्मि ।

गौतमीः—जाते, मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनम् । ततस्त्वां भर्ताऽभिज्ञास्यति । (इति यथोक्तं करोति ।)

राजाः—(शकुन्तलां निर्वर्ण्य । आत्मगतम् ।)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नापि शक्नोमि हातुम् ॥ ८ ॥

(इति विचारयन् स्थितः ।)

प्रतिहारीः—अहो धर्मापेक्षिता भर्तुः । ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति ।

शार्ङ्गरवः—भो राजन्, किमिति जोषमास्यते ।

राजाः—भोस्तपोधनाः, चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिण्यमाशङ्कमानः प्रतिपत्स्ये ।

शकुन्तलाः—(अपवार्य) आर्यस्य परिणय एव सन्देहः । कुत इदानीं मे दूराधिरोहिण्याशा ।

शार्ङ्गरवः—मा तावत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः
मुधृं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥ ९ ॥

शारद्वतः—शार्ङ्गरव, विरम त्वमिदानीम् । शकुन्तले, वक्तव्यमुक्तमस्माभिः । सोऽयमत्रभवानेवमाह दीयतामस्यै प्रत्ययप्रतिवचनम् ।

शकुन्तलाः—(अपवार्य) इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन । आत्मेदानीं मे शोचनीय इति व्यवसितमेतत् । (प्रकाशम्) आर्यपुत्र—(इत्यर्धोक्ते ।) संशयित इदानीं परिणये नैष समुदाचारः । पौरव, युक्तं नाम ते तथा पुराऽऽश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्वं प्रतार्य सांप्रतमीदृशैरक्षरैः प्रत्याख्यातुम् ।

राजाः—(कर्णौ पिधाय ।) शान्तं पापम् ।

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम् ।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च ॥ १० ॥

शकुन्तलाः—भवतु । यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।

राजाः—उदारः कल्पः ।

शकुन्तलाः—(मुद्रास्थानं परामृश्य ।) हा धिक् हा धिक् । अङ्गुलीयकशून्या मेऽङ्गुलिः । (इति सविषादं गौतमीमवेक्षते ।)

गौतमीः—नूनं ते शक्रावतराभ्यन्तरे शचीतीर्थं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् ।

राजाः—(सस्मितम् ।) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते ।

शकुन्तलाः—अत्र तावद्विधिना दर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि ।

राजाः—श्रोतव्यमिदानीं संवृत्तम् ।

शकुन्तलाः—नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते संनिहितमासीत् ।

राजाः—शृणुमस्तावत् ।

शकुन्तलाः—तत्क्षणे स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः त्वयाऽयं तावत्प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन । न

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुनस्तेऽपरिचयाद्धस्ताभ्यासमुपगतः । पश्चात्तस्मिन्नेव मया गृहीते सलिलेऽनेन प्रणयः कृतः । तदा त्वमित्थं प्रहसितोऽसि । सर्वः सगन्धेषु विश्वसिति । द्वावप्यत्रारण्यकाविति ।

राजाः——एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतवाङ्माधुभिराकृष्यन्ते विपश्चितः ।

गौतमीः———महाभाग, नार्हस्येवं मंत्रयितुम् । तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य ।

राजाः—तापसवृद्धे,

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ ११ ॥

शकुन्तलाः—(सरोषम् ।) अनार्य, आत्मनो हृदयानुमानेन प्रेक्षसे । क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते ।

राजाः - (आत्मगतम् ।) संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । (प्रकाशम् ।) भद्रे प्रथितं दुष्यन्तस्य चरितम् । तथापीदं न लक्षये ।

शकुन्तलाः—सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि यांहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयविपक्ष हस्ताभ्यासमुपगता (इति पटान्तेन मुखमावृत्य रोदिति ।)

शार्ङ्गरवः—इत्थमात्मकृतं चापलं दहति ।

अतः परीक्ष्य कर्तव्यं विशेषात्संगतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ १२ ॥

राजाः—अयि भोः, किमत्रभवतीप्रत्ययादेवास्मान्संयुतदोषाक्षरैः क्षिणुथ ।

शार्ङ्गरवः—(सासूयम् ।) श्रुतं भवद्भिरधरोत्तरम् ।

आजन्मनः शाठ्यमशिक्षितो य-
स्तस्याऽप्रमाणं वचनं जनस्य ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परातिसन्धानमधीयते यै-
विंद्येति ते सन्तु किलाप्तवाचः ॥ १३ ॥

राजाः—भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसन्धाय लभ्यते ।

शार्ङ्गरवः—विनिपातः ।

राजाः—विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत् ।

शारद्वतः—शार्ङ्गरव, किमुत्तरेण । अनुष्ठितो गुरोः संदेशः । प्रतिनिवर्तामहे वयम् । (राजानं प्रति ।)

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥ १४ ॥

गौतमि, गच्छाग्रतः । (इति प्रस्थितः ।)

शकुन्तलाः—कथमनेन कितवेन विप्रलब्धास्मि । युयमपि मां परित्यजथ । (इत्यनुप्रतिष्ठते ।)

गौतमीः—(स्थित्वा ।) वत्स शार्ङ्गरव, अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु ।

शार्ङ्गरवः—(सरोषं निवृत्य ।) किं पुरोभागे, स्वातंत्र्यमवलम्बसे । (शकुन्तला भीता वेपते ।)

शार्ङ्गरवः—शकुन्तले,

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् ॥ १५ ॥

तिष्ठ । साधयामो वयम् ।

राजाः—भोस्तपस्विन्, किमत्रभवतीं विप्रलभसे ।

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥ १६ ॥

शार्ङ्गरवः—यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवांस्तदा कथं त्वमधर्मभीरुः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—(पुरोहितं प्रति ।) भवन्तमेवात्र गुरुलाघवं पृच्छामि ।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥ १७ ॥

पुरोहितः—(विचार्य ।) यदि तावदेवं क्रियताम् ।

राजाः—अनुशास्तु मां भवान् ।

पुरोहितः—अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु । कुत इदमुच्यत इति चेत् । त्वं साधुभिरादिष्टपूर्वः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति । स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव ।

राजाः—यथा गुरुभ्यो रोचते ।

पुरोहितः—चलसे, अनुगच्छ माम् ।

शकुन्तलाः—भगवति वसुधे, देहि मे विवरम् । (इति रुदती स्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च ।)

शाकुन्तलम् ।

अभ्यासः—१ शब्द चालवा-पति, अनुडुह्, इदम्, आशिस्. २ नेहमीं बहुवचनीं चालणारे शब्द द्या. जसें आपः । ३ तरतमभावाचीं रूपें द्या—क्षुद्र, बहुल, बहु.

---

५१ शूद्रकः शुकं स्ववृत्तान्तं पृच्छति ।

संदर्भः—शूद्रक नांवाच्या राजाला एका चंडाल कन्येनें एक पोपट दिला. तो पोपट संस्कृत भाषेत राजाचा जयजयकार करतो. आश्चर्य वाटून राजा त्याला त्याची हकीकत विचारतो.

अथ मुहूर्तादिव वैशंपायनः प्रतिहार्या गृहीतपञ्जरः कनकवेत्रलतावलम्बिना किंचिदवनतपूर्वकायेन मन्दमन्दसंचारिणा कञ्चुचिनाऽनुगम्यमानो राजान्तिकमाजगाम । क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत् । देव, देव्यो विज्ञापयन्ति । देवादेशादेष वैशंपायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्याऽनीतः । इत्यभिधाय गते तस्मिन्राजा वैशंपायनमपृच्छत् । कच्चिदभिमतमास्वादितमन्तरे भवता किंचिदशवजात-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मिति । स प्रत्युवाच । देव, किं वा नास्वादितम् । प्रकाममापीतः कषाय-मधुरो जम्बूफलरसः । हरिनखरैर्भिन्नमत्तमातङ्गकुम्भेभ्यो मुक्तरक्तार्द्रमुक्ता-फलत्विषि खण्डितानि दाडिमबीजानि । नलिनीदलहरीन्ति द्राक्षाफलस्वादूनि-च दलितानि स्वेच्छयाऽऽमलकीफलानि । किं वा प्रलपितेन बहुना । सर्वमेव देवीभिः स्वयं करकमलोपनीयमानममृतायते । इत्येवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत् । आस्तां तावत्सर्वमेवेदम् । अपनयतु नः कुतूहलम् । आवेद-यतु भवानादितः प्रभृति कात्स्न्येनात्मनो जन्म । कस्मिन्देशे भवान् कथं जातः । केन वा नाम कृतम् । का माता । कस्ते पिता । कथं वेदानामागमः । कथं शास्त्राणां परिचयः । कुतः कलाः समासादिताः । किं जन्मान्तरानु-स्मरणम् । उत वरप्रदानम् । अथवा विहंगवेषधारी कश्चिच्छन्नो वससि । क्व वा पूर्वमुषितम् । कियद्वा वयः । कथं पञ्जरबन्धः । कथं चाण्डालहस्त-गमनम् । इह वा कथमागमनम् । इति । वैशंपायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत् । देव, महतीयं कथा । यदि कौतुकमाकर्ण्यताम् ।

कादम्बरी ।

अभ्यासः—१ पत्नी, देह या अर्थाचे तीन लिंगी शब्द द्या. २ भूत. का. वा. धा. साधितें द्या—ग्रह्, सह्, अद्. ३ परोक्ष भू. धा. सा. द्या—हन्, वह्, ब्रू.

---

५२ हिमालयवर्णनम् ।

परिचयः—रघुवंशाप्रमाणेंच कुमारसंभव हें कालिदासाचें दुसरें काव्य आहे. कुमार म्हणजे कार्तिकेय-कार्तिकस्वामी. याच्या जन्माचें वर्णन या काव्यांत आहे. हा देवांचा सेनापति आहे. आरंभींच हिमालयाचें वर्णन आहे.

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥ १ ॥
यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥ २ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ ३ ॥
आमेखलं सञ्चरतां घनानां छायामधः सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥ ४ ॥
पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विन्दन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ॥ ५ ॥
यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ॥ ६ ॥
कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥ ७ ॥
दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ॥ ८ ॥
लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति वालव्यजनैश्चमर्यः ॥ ९ ॥
भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ॥ १० ॥
यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥ ११ ॥
स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ॥ १२ ॥

कुमारसम्भवे प्रथमः सर्गः

अभ्यासः—१ वाक्यांत योजा–उत्तरेण, क्लृप्, रुच्. २ समास सोडवा– यथार्थनामा, नानार्थाहरणम्, महाभारतेतिहासरामायणेषु. ३ संधि करा–गच्छन्+अध्वनः+अर्धात्+भूयः+अश्राम्यत् ।

५२ पञ्जरस्थः शुको जाबाल्याश्रमं वर्णयति ।

संदर्भः—कादंबरींतील पंजरस्थ शुक (पोपट) झाडावरून पडल्यावर स्नानास जाणाऱ्या एका ऋषिकुमारानें पाहिला. त्यास उचलून कुमारानें आपल्याबरोबर नेल्यावर त्या पोपटानें जाबाली ऋषीचा आश्रय पाहिला.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनतिदूरमिव गत्वा दिशि दिशि सदासंनिहितकुसुमफलैस्तालतमाल-बकुलादिपादपैरुपगूढं, गृहीतसमित्कुशकुसुमैरध्ययनमुखरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरशून्योपकण्ठं, धृताहुतिप्रीतैश्चित्रभानुभिः सशरीरमेव मुनि-जनममरलोकं निनीषुभिरुद्भूयमानधूमलेखाछलेनाबध्यमानस्वर्गमार्गगमन-सोपानसेतुमिवोपलक्ष्यमाणं, वाताऽवनमिताशिखराभिर्वनलताभिः प्रणम्यमान-मनवरतमुक्तकुसुमैः पादपैरभ्यर्च्यमानं, निदाघावसानमिव प्रत्यासन्नजल प्रपातं, मातङ्गकुलाध्यासितमपि पवित्रं, सुरभिविलेपनधरमपि सततविभूत-हव्यधूमगन्धं, परिपूर्णद्विजपतिमण्डलसनाथमपि सदासंनिहिततरुगहनान्ध-कारं, अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम् ।

अस्मिन्नाश्रमे मलिनता हविर्धूमेषु न चरितेषु, मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्चलता कदलीदलेषु न मनःसु, चक्षूरागः कोकिलेषु न परकलत्रेषु, कण्ठग्रहः कमण्डलुषु न प्रेमालिङ्गनेषु, मेखलाबन्धो व्रतेषु नेर्ष्याकलहेषु, स्तनस्पर्शो होमधेनुषु न काभिनीषु, पक्षपातः कृकवाकुषु न विद्याविवादेषु, भ्रान्तिरनलप्रदक्षिणासु न शास्त्रार्थेषु, गणना रुद्राक्षवलयेषु न शरीरेषु, मुनिबालनाशः क्रतुदीक्षया न मृत्युना, रामानुरागो रामायणेन न यौवनेन, मुखभङ्गविकारो जरया न धनाभिमानेन । यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितं, वयः परिणामे द्विजपतनं, उपवनचन्दनेषु जाड्यं, अग्नीनां भूतिमत्त्वं, हरिणानां गीतश्रवणव्यसनं, शिखण्डिनां नृत्यपक्षपातो, भुजङ्गानां भोगः, कपीनां श्रीफलाभिलाषः, मूलानामधोगतिः ।

, कादम्बरी ।

अभ्यासः—१ वाक्यांत योजा–अभि+नि+विश्, अलम्, इति. २ संधि करा—शनैः+वीजयन्+संज्ञां+ग्राहितवान्. ३ प्रयोग बदला–वसिष्ठः तौ दम्पती राजधानीं प्रस्थापयामास । देवा नलं वरैरन्वगृह्णन् ।

५४ शुकनासवर्णनम् ।

संदर्भः—कादंबरींत तारापीड नांवाचा एक राजा आहे. चंद्रापीड हा त्याचा मुलगा व शुकनास हा त्याचा मुख्य प्रधान. हा फार विद्वान्, व्यवहार-कुशल व कर्तृत्ववान् होता.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्य च राज्ञो (तारापीडस्य) निखिलशास्त्रकलावगाहगम्भीरबुद्धिः, आ शैशवादुपारूढनिर्भरप्रेमरसो नीतिशास्त्रप्रयोगकुशलो भुवनराज्यभारनौकर्णधारो महत्स्वपि कार्यसंकटेष्वविषण्णधीः, धाम धैर्यस्य, स्थानं स्थितेः, सेतुः सत्यस्य, गुरुर्गुणानां, आचार्य आचाराणां, धाता धर्मस्य, शेषाहिरिव महीभारधारणक्षमः, सलिलनिधिरिव महासत्त्वः, जरासंध इव घटितसंधिविग्रहः, त्र्यम्बक इव प्रसाधितदुर्गः, युधिष्ठिर इव धर्मप्रभवः, सकलवेदवेदाङ्गविदशेषराज्यमङ्गलैकसारो बृहस्पतिरिव सुनासीरस्य, कविरिव वृषपर्वणो, वसिष्ठ इव दशरथस्य, विश्वामित्र इव रामस्य, धौम्य इवाजातशत्रोः, दमनक इव नलस्य, सर्वकार्येष्वाहितमतिरमात्यो ब्राह्मणः शुकनासो नामाऽऽसीत् । यो नारायणवक्षःस्थलेऽपि स्थितामदुष्करलाभामन्यत प्रज्ञाबलेन लक्ष्मीम् । यं च समासाद्य दर्शितानेकराज्यफला लतेव महापादपमनेकप्रतानगहनां विस्तारमुपययौ प्रज्ञा । अनेकचारपुरुषसंचारनिचिते चतुरुदधिवलयपरिखाप्रमाणे धरणितले, भवन इव, राज्ञां समुच्छ्वसितमपि यस्य नाविदितमासीत् ।

कादम्बरी ।

अभ्यास–१ ओळखा– ईजिरे, त्रिभाय, अवधीत्, अधीयताहे. २ स्त्रीलिंगी रूपें द्या–भवः, विद्वस्, चतुर्थ, श्वन्. ३ प्रयोजक करा–अध्यापकः शिष्याय पारितोषिकं यच्छति । उद्याने रामो गन्धं जिघ्रति ।

---

५५ पत्रलेखावर्णनम् ।

संदर्भः—राजपुत्र चंद्रापीड विद्याभ्यास संपवून परत राजधानींत आल्यावर महाराणी विलासवतीनें पत्रलेखा नांवाची राजकन्या त्याच्याकडे त्याची मैत्रीण म्हणून पाठविली.

स कैलासनामा कञ्चुको कृतप्रणामः समुपसृत्य क्षितितलनिहितदक्षिणकरश्चन्द्रापीडं विज्ञापयामास । कुमार महादेवी विलासवती समाज्ञापयति । इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती बन्दीजनेन सहानीयान्तः—पुरपरिचारिकामध्यमुपनीता । सा मया विगतनाथा राजदुहितेति समुप-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जातस्नेहया दुहितृनिर्विशेषमियन्तं कालमुपलालिता संवर्धिता च । तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेपिता । न चास्यामायुष्मता परिजनसामान्यदृष्टिना भवितव्यम् । बालेव लालनीया । स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया । शिष्येवद्रष्टव्या । सुहृदिव सर्वविश्रम्भेप्वभ्यन्तरीकरणीया । दीर्घकालसंवर्धितस्नेहतया स्वसुतायामिव हृदयमस्यामस्ति मे । बलवानस्यां पक्षपातः । महाभिजनराजवंशप्रसूता चार्हतीयमेवंविधानि कर्माणि । नियतं स्वयमेवेयमतिविनीततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति । केवलमतिचिरकालोपचिता बलवती मे प्रेमप्रवृत्तिरस्यामविदितशीलश्चास्याः कुमार इति संदिश्यते । सर्वथा तथा कल्याणिना प्रयतितव्यं यथेयमतिचिरमुचिता परिचारिका ते भवति । इत्यभिधाय विरतवचसि कैलासे कृताभिजातप्रगामां पत्रलेखामनिमिपलोचनं सुचिरमालोक्य चन्द्रापीडो यथाऽऽज्ञापयत्यम्बेत्येवमुक्त्वा कञ्चुकिनं प्रेपयामास ।

पत्रलेखा तु ततःप्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य न भ्रमतो न राजकुलगतस्य छायेव राजसूनोः पार्श्वं मुमोच । चन्द्रापीडस्यापि तस्यां दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत् । अभ्यधिकं च प्रतिदिवसमस्याः प्रसादमकरोत् । आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेप्वमन्यत ।

कादम्बरी ।

अभ्यासः—१ ओळखा–जहास, आनर्हुः, यियासुः, अप्राक्षम्. २ संधितान्+चौरान्+जहि । ३ आज्ञार्थ–द्वि. पु. ए. व.–शास्, हन्, हा–टाकणें.

---

५६ मदनदहनम् ।

संदर्भः—शंकराची सेवा करण्याच्या इच्छेनें पार्वती आली असतांना तिनें शंकरास नमस्कार केला. शंकरांनीं तिला उत्तम पति मिळो असा आशीर्वाद दिला. इतक्यांत मदनानें ओपलें शरसंधान शंकरावर रोखलें. शंकरांनीं आपल्या मनाचो झालेली चलबिचल ओळखून मन स्थिर केलें व या गोष्टीस कारणीभूत झालेल्या मदनाचें जाळून भस्म केलें.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥ १ ॥
तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥ २ ॥
उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥ ३ ॥
अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ॥ ४ ॥
कामस्तु वाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥ ५ ॥
अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ॥ ६ ॥
प्रतिग्रहीतुं प्रणयिप्रियत्वाद्विलोचनस्तामुपचक्रमे च ।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥ ७ ॥
हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ ८ ॥
विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥ ९ ॥
अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्ददृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ १० ॥
स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ११ ॥
तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥ १२ ॥
क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ १३ ॥
तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ १४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥ १५ ॥

कुमारसम्भवे तृतीयःसर्गः ।

अभ्यासः—१ शब्द चालवा—अहन्, पुंस्, गो, विश्ववाह २ वाक्यांत योजा—वरं—न, क—क. ३ वर्त. का. धा. सा. द्या—रम्, शी, विश्, अट्.

---

५७ उर्वशीमोचनम् ।

परिचयः—विक्रमोर्वशीय हें नाटक कालिदासानें रचिलें. त्याची एकंदर नाटकें तीन. पहिल्या प्रतीचें शाकुंतल, दुसऱ्या प्रतीचें विक्रमोशीय व. शेवटचें मालविकाग्निमित्र. असुरांपासून उर्वशीचें रक्षण पुरूरव्यानें केल्यावर परस्परांवर एकमेकांचें प्रेम बसतें. नंतर यथाक्रम उभयतांचा विवाह, विरह व पुनर्मीलन वगैरे गोष्टी झाल्या.

संदर्भः—प्रस्तुत पाठांत पुरूरव्यानें उर्वशीचें रक्षण केलें व तिला तिच्या मैत्रिणींत आणून सोडलें हा कथाभाग आहे.

(ततः प्रविशन्त्यप्सरसः ।)

अप्सरसः—परित्रायतां परित्रायतां यः सुरपक्षपाती यस्य वाऽम्बरतले गतिरस्ति ।

(ततः प्रविशति राजा पुरूरवा रथेन सूतश्च ।)

राजाः—अलमाक्रन्दितेन । सूर्योपस्थानात् प्रतिनिवृत्तं पुरूरवसं मामुपेत्य कथ्यतां कुतो भवत्यः परित्रातव्या इति ।

रम्भाः—असुरावलेपात् ।

राजाः—किं पुनरसुरावलेपेन भवतीनामपराद्धम् ।

राजाः—शृणोतु महाराजः । या तपोविशेषपरिशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य, प्रत्यादेशो रूपगर्वितायाः श्रियः, अलंकारः स्वर्गस्य, सा नः प्रियसख्युर्वशी कुबेरभवनात्प्रतिनिवर्तमाना समापत्तिदृष्टेन हिरण्यपुरवासिना केशिना दानवेन चित्रलेखाद्वितीयाऽर्धपथ एव बन्दिग्राहं गृहीता ।

राजाः—अपि ज्ञायते कतमेन दिग्भागेन गतः स जालमः ।

सहजन्याः—पूर्वोत्तरेण ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—तेन हि मुच्यतां विषादः । यतिष्ये वः सखीप्रत्यानयनाय ।

सर्वाः—सदृशं खलु सोमादेकान्तरस्य ।

राजाः—क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति ।

अप्सरसः—एतस्मिन्हेमकूटशिखरे ।

राजाः—सूत, ऐशानीं दिशं प्रति चोदयाश्वानाशुगमनाय ।

सूतः—यदाज्ञापयत्यायुष्मान् । (इति यथोक्तं करोति ।)

राजाः—(रथवेगं निरूपयन्) साधु साधु । अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयमप्यासादयेयम् । किं पुनस्तमपकारिणं मघोनः ।

(निष्क्रान्तो राजा रथेन सूतश्च ।)

रम्भाः—हला गतो राजर्षिः । तद्वयमपि यथासंदिष्टं प्रदेशं संक्रमामहे ।

शेषाः—तथा । (इति सर्वाः शैलावतरणं रूपयित्वा स्थिताः ।)

रम्भाः—अपि नाम स राजर्षिरुद्धरेन्नो हृदयशल्यम् ।

मेनकाः—हला मा ते संशयो भवतु । उपस्थितसंपरायो महेन्द्रोऽपि मध्यमलोकात्सबहुमानमानाय्य तमेव विजयसेनामुखे नियुङ्क्ते ।

रम्भाः—सर्वथेह विजयी भवतु । (क्षणमात्रं स्थित्वा ।) हला हला, समाश्वसित समाश्वसित । एष उच्चलितहरिणकेतनस्तस्य राजर्षेः सोमदत्तो रथो दृश्यते । न खलु एषोऽकृतार्थो निवर्तिष्यते ।

(सर्वा उच्चक्षुषो विलोकयन्ति ।)

(ततः प्रविशति रथारूढो राजा सूतश्च चित्रलेखावलम्बिता भयनिमीलिताक्षी चोर्वशी ।)

चित्रलेखाः—समाश्वसितु समाश्वसितु प्रियसखी ।

राजाः—सुन्दरि, समाश्वसिहि समाश्वसिहि ।

गतं भयं भीरु सुरारिसम्भवं ।
त्रिलोकरक्षी महिमा हि वज्रिणः ।
तदेतदुन्मीलय चक्षुरायतं
महोत्पलं प्रत्युषसीव पद्मिनी ॥ १ ॥

चित्रलेखाः—अहो कथमुच्छ्वसितमात्रसंभावितजीविताऽद्यापि संज्ञां न प्रतिपद्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—बलवदत्रभवती परित्रस्ता ।

चित्रलेखाः—सखि उर्वशि, पर्यवस्थापयात्मानम् । अनप्सरेव प्रतिभासि मे ।

(उर्वशी प्रत्यागच्छति ।)

राजाः—(सहर्षम् ।) अयि, प्रकृतिमापद्यते ते प्रियसखी । पश्य ।

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा ॥
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम् ॥ २ ॥

चित्रलेखाः—सखि, विश्रब्धा भव । पराभूताः खलु त्रिदशपरिपन्थिनो हताशाः ।

उर्वशीः—(चक्षुषी उन्मील्य ।) किं प्रभावदर्शिना महेन्द्रेण ।

चित्रलेखाः—न महेन्द्रेण । महेन्द्रसदृशानुभावेनानेन राजर्षिणा पुरूरवसा ।

उर्वशीः—(राजानमवलोक्य । आत्मगतम् ।) उपकृतं खलु दानवैः ।

राजाः—(प्रकृतिस्थामुर्वशीं निर्वर्ण्य । आत्मगतम् ।) स्थाने खलु नारायणमृषिं विलोभयन्त्यस्तदूरुसम्भवामिमां दृष्ट्वा व्रीडिताः सर्वा अप्सरस इति । अथ वा नेयं तपस्विनः सृष्टिर्भवितुमर्हति ।

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ ३ ॥

उर्वशीः—हला, स सखीजनः कुत्र खल्विदानीं भवेत् ।

चित्रलेखाः—अभयदायी महाराजो जानाति ।

राजाः—(उर्वशीमवलोकयन् ।) महति विषादे वर्तते ।

उर्वशीः—(अपवार्य ।) अभिजातं खल्वस्य वचनम् । अथ वा चन्द्रादमृतमिति किमत्राश्चर्यम् । (प्रकाशम् ।) अत एवैनं प्रेक्षितुं त्वरते मे हृदयम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—(हस्तेन दर्शयन् ।)

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः ।
प्रत्यागतप्रसादं चन्द्रमिवोपप्लवान्मुक्तम् ॥ ४ ॥

चित्रलेखाः—सखि पश्य ।

उर्वशीः—(राजानं सस्पृहं पश्यन्ती ।) समदुःखः पिबतीव मां नयनाभ्याम् ।

चित्रलेखाः—(साकूतम् ।) अयिः, कः ।

उर्वशीः—ननु सखीजनः ।

राजाः—सूत, इदं तच्छैलशिखरम् । अवतार्यतां रथः ।

सूतः—यदाज्ञापयत्यायुष्मान् । (इति तथा करोति ।)

रम्भाः—सख्यः, एत, प्रियकारिणं संभावयामो राजर्षिम् । (सर्वा उपसर्पन्ति ।)

राजाः—सूत, स्थापय तावद्रथम् यावत्पुनरियं सखीभिः संपर्कं याति । (सूतस्तथा करोति ।)

अप्सरसः—दिष्ट्या महाराजो विजयेन वर्धते ।

राजाः—भवत्यश्च सखीसमागमेन ।

उर्वशीः—(चित्रलेखादत्तहस्ता रथादवतीर्य ।) सख्यः, एत, पीडितां मां परिष्वजध्वम् । न खलु ममाऽसीदाशा भूयोऽपि सखीजनं द्रक्ष्यामीति ।

(सख्यस्त्वरिताः परिष्वजन्ते ।)

रम्भाः—सर्वथा महाराजः कल्पशतानि पृथिवीं पालयन्भवतु ।

विक्रमोर्वशीयम् ।

---

५८ यक्षमन्दिरम् ।

संदर्भः—कालिदास कवीच्या मेघदूत काव्यांत यक्षानें मेघाला आपल्या नगरीचा मार्ग सांगितल्यावर स्वतःचें मंदिर ओळखण्याकरितां कांहीं खुणा सांगितल्या. त्यांचें वर्णन या श्लोकांमध्यें आहे.

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूरालक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ १ ॥
वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ २ ॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ३ ॥
रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः ॥ ४ ॥
तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥ ५ ॥
एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ ६ ॥

मेघदूतम् ।

अभ्यासः—१ ओळखा—वक्ष्यति, जीवग्राहम्, परीप्सुः, निरगात् । २ प्रयोग बदला—नृपमूचे वचनं वृकोदरः । सुराः सागरं रत्नानि ममन्थुः । उदाहरणं बाह्वोर्गापयामास किन्नरान् । ३ स्त्रीलिंगी रूपे द्या—शूद्रः, आचार्यः, अरण्यम्.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५९ यक्षपत्नीवर्णनम् ।

संदर्भः—यक्षाच्या घरीं गेल्यावर मेघाची व यक्षपत्नीची भेट होईल. त्यावेळीं यक्षपत्नी कशी दिसेल, ती काय करीत असेल तें वर्णन पुढील श्लोकांत आहे.

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येवधातुः ॥ १ ॥
तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ २ ॥
नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं तदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥ ३ ॥
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ ४ ॥
उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचिद्
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥ ५ ॥
शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ६ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥ ७ ॥

मेघदूतम् ।

अभ्यासः—१ समास सोडवा—अनुत्तमम्, अनुरूपम्, यथाविधि. २ वाक्यांत योजा—धिक्, उत, कोऽर्थः, प्र+स्था. ३ ओळखा—अर्पयामास, जीर्णम्, आतस्थुषा.

---

६० सर्वदमनचापलम् ।

संदर्भः—शाकुंतलाच्या ज्ञातव्या अंकांत दुष्यंत राजा इंद्राला मदत करून राजधानीला परत येत असतां वाटेंत मारीच ऋषीचा-कश्यपाचा-आश्रम त्याला दिसला. मारीच मुनीला वंदन न करतां जाणें अयोग्य समजून राजा त्याच्या आश्रमांत दर्शनासाठीं गेला. मारीचऋषी धर्मनिरूपणांत गुंतले आहेत असें कळल्यावर त्यांत व्यत्यय येऊं नये म्हणून राजा आश्रमांतच थांबला. त्यावेळीं सर्वदमन नांवाच्या मुलाला संभाळण्याकरितां ठेवलेल्या तापसीनें राजाकडे सहज मदतीची याचना केली. पुढें झालेल्या संवादांत हा मुलगा आपलाच असें राजास कळून आलें व नंतर राजा आणि शकुंतला यांची भेट झाली.

(नेपथ्ये)

मा खलु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् ।

राजाः—(कर्णं दत्वा ।) अभूमिरियमविनयस्य । को नु खल्वेष निषिध्यते । (शब्दानुसारेणावलोक्य । सविस्मयम् ।) अये, को नु खल्वयमबालसत्त्वो बालः ।

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥ १ ॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः ।)

बालः—जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमाः—अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्वानि विप्रकरोषि। हन्त वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

राजाः—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः। नूनमनपत्यता मां वत्सलयति।

द्वितीयाः—एषा खलु केसरिणी त्वां लङ्घयति यद्यस्याः पुत्रकं न मुञ्चसि।

बालः—(सस्मितम्।) अहो बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति।

राजाः—महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः॥ २॥

प्रथमाः—वत्स, एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

बालः—कुत्र। देह्येतत्। (इति हस्तं प्रसारयति।)

राजाः—कथं चक्रवर्तिलक्षणमप्यनेन धार्यते।

द्वितीयाः—सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीय उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।

प्रथमाः—तथा। (इति निष्क्रान्ता।)

बालः—अनेनैव तावत्क्रीडिष्यामि। (इति तापसीं विलोक्य हसति।)

राजाः—स्पृहयामि खलु दुर्ललितायास्ते।

आलक्ष्यदन्तमुकुलाननिमित्तहासै—
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति॥ ३॥

तापसीः—भवतु। न मामयं गणयति। (पार्श्वमवलोक्य।) कोऽत्र ऋषिकुमाराणाम्। (राजानमवलोक्य।) भद्रमुख, एहि तावत्। मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—(उपगम्य । सस्मितम् ।) अयि भो महर्षिपुत्र,

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः ॥ ४ ॥

तापसीः—भद्रमुख, न खल्वयमृषिकुमारः ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयिति । स्थानप्रत्ययात्तु वयमेवं-तर्किणः । (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य । आत्मगतम् ।)

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृत्तिं चेतसि तस्य कुर्या—
द्यस्यायमङ्गात्कृतिनः प्ररूढः ॥ ५ ॥

तापसीः—(उभौ निर्वर्ण्य ।) आश्चर्यमाश्चर्यम् ।

राजाः—आर्ये, किमिव ।

तापसीः—अस्य बालकस्य तेऽपि संवादिन्याकृतिरिति विस्मितास्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्तः ।

राजाः—(बालकमुपलालयन् ।) न चेन्मुनिकुमारोऽयमथ कोऽस्य व्यपदेशः ।

तापसीः—पुरुवंशः ।

राजाः—(आत्मगतम् ।) कथमेकान्वयो नाम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम् ।
नियतैकपतिव्रतानि पश्चा—
त्तरुमूलानि गृहीभवन्ति तेषाम् ॥ ६ ॥

(प्रकाशम् ।) न पुनरात्मगत्या मानुषाणामेष विषयः ।

तापसीः—यथा भद्रमुखो भणति । अप्सरःसंबन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता ।

राजाः—(अपवार्य) हन्त द्वितीयमिदमाशाजननम् । (प्रकाशम् ।) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तापसीः—कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति ।

राजाः—(स्वगतम् ।) इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि । अथवाऽनार्यः परदारव्यवहारः ।

(प्रविश्य मृन्मयूरहस्ता ।)

तापसीः—सर्वदमन, शकुन्तलावर्ण्यं प्रेक्षस्व ।

बालः—(सदृष्टिक्षेपम् ।) कुत्र वा मम माता ।

उभेः—नामसादृश्येन वञ्चितो बालः ।

द्वितीयाः—वत्स, अस्यं मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।

राजाः—(आत्मगतम् ।) किं वा शकुन्तलेत्यस्य मातुराख्या । सन्ति पुनर्नामधेयसादृश्यानि । अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पेत ।

बालः—मातः, रोचते म एष भद्रमयूरः । (इति क्रीडनकमादत्ते ।)

प्रथमाः—(विलोक्य । सोद्वेगम् ।) अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते ।

राजाः—अलमावेगेन । नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम् । (इत्यादातुमिच्छति ।)

उभेः—मा खल्वेतदवलम्ब्य—कथं गृहीतमनेन । (इति विस्मया-दुरोनिहितहस्ते परस्परमवलोकयतः ।)

राजाः—किमर्थं प्रतिषिद्धाः स्थ ।

प्रथमाः—शृणोतु महाराजः । एषाऽपराजिता नामौषधिरस्य जात-कर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति ।

राजाः—अथ गृह्णाति ।

प्रथमाः—ततस्तं सर्पो भूत्वा दशति ।

राजाः—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ।

उभेः—अनेकशः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजाः—(सहर्षम् । आत्मगतम् ।) कथमिव संपूर्णमपि मे मनोरथं नाभिनन्दामि । (इति बालं परिष्वजते ।)

द्वितीयाः—सुव्रते, एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः । (इति निष्क्रान्ते ।)

बालः—मुञ्च माम् । यावन्मातुः सकाशं गमिष्यामि ।

राजाः—पुत्रक, मया सहैव मातरमभिनन्दिष्यसि ।

बालः—मम खलु तातो दुष्यन्तः । न त्वम् ।

राजाः—(सस्मितम् ।) एष विवाद एव प्रत्याययति ।

(ततः प्रविशत्येकवेणीधरा शकुन्तला ।)

शकुन्तलाः—विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशाऽऽसीदात्मनो भागधेयेषु । अथ वा यथा सानुमत्याऽऽख्यातं तथा संभाव्यत एतत् ।

राजाः—(शकुन्तलां विलोक्य ।) अये, सेयमत्रभवती शकुन्तला यैषा

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ॥७॥

शकुन्तलाः—(पश्चात्तापविवर्णं राजानं दृष्ट्वा ।) न खल्वार्यपुत्र इव । ततः क इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति ।

बालः—(मातरमुपेत्य ।) मातः, एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति ।

राजाः—प्रिये, क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तं यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

शकुन्तलाः—(आत्मगतम् ।) हृदय, समाश्वसिहि समाश्वसिहि । परित्यक्तमत्सरेणानुकम्पिताऽसि दैवेन । आर्यपुत्रः खल्वेषः । (प्रकाशम् ।) जयतु जयत्वार्यपुत्रः । (इत्यर्धोक्ते बाष्पकण्ठी विरमति ।)

बालः—मातः, क एषः ।

शकुन्तलाः—वत्स, ते भागधेयानि पृच्छ ।

शाकुन्तलम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६१ गङ्गास्तुतिः ।

परिचयः—जगन्नाथ पंडितांनीं गंगालहरी हें काव्य लिहिलें. पश्चात्तापयुक्त अन्तःकरणानें हें काव्य लिहिलें असल्यामुळें भक्तिरसानें तें ओथंबलेलें आहे.

समृद्धं सौभाग्यं सकलवसुधायाः किमपि त-
न्महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥ १ ॥
दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां
द्रुतं दूरीकुर्वन्सकृदुपगतो दृष्टिसरणिम् ।
अपि द्रागविद्याद्रुमदलनदीक्षागुरुरिह
प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥ २ ॥
तवालम्बादम्ब स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः ।
इदानीमौदास्यं भजसि यदि भागीरथि तदा
निराधारो हा रोदिमि कथय केषामिह पुरः ॥ ३ ॥
स्मृतिं याता पुंसामकृतसुकृतानामपि च या
हरत्यन्तस्तन्द्रां तिमिरमिव चन्द्रांशुसरणिः ।
इयं सा ते मूर्तिः सकलसुरसंसेव्यसलिला
ममान्तःसन्तापं त्रिविधमपि पापं च हरताम् ॥ ४ ॥
अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
विलोलद्वानीरं तव जननि तीरं श्रितवताम् ।
सुधातः स्वादीयः सलिलभरमातृप्ति पिबतां
जनानामानन्दः परिहसति निर्वाणपदवीम् ॥ ५ ॥
प्रभाते स्नान्तीनां नृपतिरमणीनां कुचतटी—
गतो यावन्मातर्मिलति तव तोयैर्मृगमदः ।
मृगास्तावद्वैमानिकशतसहस्रैः परिवृता
विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम् ॥ ६ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मृतं सद्यः स्वान्तं विरचयति शान्तं सकृदपि
प्रगीतं यत्पापं झटिति भवतापं च हरति ।
इदं तद्गङ्गेति श्रवणरमणीयं खलु पदं
मम प्राणप्रान्ते वदनकमलान्तर्विलसतु ॥ ७ ॥
यदन्तः खेलन्तो बहुलतरसंतोषभरिता
न काका नाकाधीश्वरनगरसाकाङ्क्षमनसः ।
निवासालोकानां जनिमरणशोकापहरणं
तदेतत्ते तीरं श्रमशमनधीरं भवतु नः ॥ ८ ॥
महादानैर्ध्यानैर्बहुविधवितानैरपि च यत्
न लभ्यं घोराभिः सुविमलतपोराशिभिरपि ।
अचिन्त्यं तद्विष्णोः पदमखिलसाधारणतया
ददाना केनासि त्वमिह तुलनीया कथय नः ॥ ९ ॥
स्खलन्ती स्वर्लोकादवनितलशोकापहृतये
जटाजूटग्रन्थौ यदसि विनिबद्धा पुरभिदा ।
अये निर्लोभानामपि मनसि लोभं जनयतां
गुणानामेवायं तव जननि दोषः परिणतः ॥ १० ॥
कृतक्षुद्रैनस्कानथ झटिति संतप्तमनसः
समुद्धर्तुं सन्ति त्रिभुवनतले तीर्थनिवहाः ।
अपि प्रायश्चित्तप्रसरणपथातीतचरितान्
नरान्दूरीकर्तुं त्वमिव जननि त्वं विजयसे ॥ ११ ॥
निधानं धर्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव वपुः ॥ १२ ॥

गंगालहरी ।

अभ्यासः—१ ओळखा—अध्यापयामास, बुभुक्षया, हीनः, व्यरंसीत् ।
२ सामासिक शब्द द्या—माता च पिता च । पञ्च वा षड् वा । निश्चितं श्रेयः,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तानां अह्नाम् । समाहारः । ३ समास सोडवा—युवराजः, सुहृद्, चक्रपाणिः, अविघ्नम् ।

---

६२ जाबालिवर्णनम् ।

संदर्भः—पंजरस्थ पोपट आपली गोष्ट सांगत असतां त्याला ज्यावेळीं मुनिकुमारानें आश्रमांत नेलें त्यावेळीं तेथें वसलेले जाबालि ऋषी त्याच्या दृष्टीस पडले. त्यांना पाहिल्यावर त्या पोपटास काय वाटलें ते विचार त्यानें पुढें सांगितले आहेत.

अवलोक्य चाहमचिन्तयम् । अहो प्रभावस्तपसाम् । इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषस्तेजांसि प्रतिहन्ति । सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य । शुष्कनलकाशकुसुमनिपतितानलचटुलवृत्ति नित्यमसहिष्णु तपस्विनां तनुतपसामपि तेजः प्रकृत्या भवति । किमुत सकलभुवनतलवन्दितचरणानामनवरततपःक्षपितमलानां करतलामलकफलवदखिलं जगदालोकयतां दिव्येन चक्षुषा भगवतामेवंविधानामघक्षयकारिणाम् । पुण्यानि हि नामग्रहणान्यपि महामुनीनां किं पुनर्दर्शनानि । धन्यमिदमाश्रमपदमयमधिपतिर्यत्र । अथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना । पुण्यभाजः खल्वमी मुनयः, यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारा मुखावलोकननिश्चलदृष्टयः पुण्याः कथाः शृण्वन्तः समुपासते । सरस्वत्यपि धन्या याऽस्य तु सततमतिप्रसन्ने करुणाजलनिस्यन्दिन्यगाधगाम्भीर्ये रुचिरद्विजपरिवारा मुखकमलसम्पर्कमनुभवन्ती निवसति हंसीव मानसे । चतुर्मुखमुखकमलवासिभिश्चतुर्वेदैः सुचिरादिव द्वितीयमिदमपरमुचितमासादितं स्थानम् । एनमासाद्य शरत्कालमिव कलिकालजलदसमयकलुषिताः प्रसादमुपगताः पुनरपि जगति सरित इव सर्वविद्याः । नियतमिह सर्वात्मना कृतावस्थितिना भगवता परिभूतकलिकालविलसितेन धर्मेण न स्पर्धते कृतयुगस्य । धरणितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमण्डलनिवासाभिमानमम्बरतलम् । अहो महासत्त्वेयं जरा याऽस्य प्रलयरविरश्मिनिकरदुर्विरीक्ष्ये रजनिकरकिरणपाण्डुरशिरोरुहे जटाभारे फेनपुञ्ज-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धवला गङ्गेव पशुपतेः, क्षीराहुतिरिव शिखाकलापे विभावसोर्निपतन्ती न भीता । बहलाज्यधूमपटलमलिनीकृताश्रमस्य भगवतः प्रसादान्नीतमिव रविकिरणजालमपि दूरतः परिहरति तपोवनम् । एते च पवनलोलपुञ्जीकृतशिखाकलापा रचिताञ्जलय इवात्र मंत्रपूतानि हवींषि प्रतिगृह्णन्त्येतत्प्रीत्याऽऽशुशुक्षणयः । तीरलितदुकूलवल्कलोयं चाश्रमलताकुसुमसुरभिपरिमलो मन्दसंचारी सशङ्क इवास्य समीपमुपसर्पति गन्धवाहः । प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि । सर्वतेजस्विनामयं चाग्रणीः । द्विसूर्यमिवाभाति जगदनेनाधिष्ठितं महात्मना । निष्कम्पेव क्षितिरेतदवष्टम्भात् । एष प्रवाहः करुणारसस्य, संतरणसेतुः संसारसिन्धोराधारः क्षमाम्भसां, परशुस्तृष्णालतागहनस्य, सागरः सन्तोषामृतस्योपदेष्टा सिद्धिमार्गस्यास्तगिरिरसद्ग्रहस्य, मूलमुपशमतरोर्नाभिः प्रज्ञाचक्रस्य, स्थितिवंशो धर्मध्वजस्य, तीर्थं सर्वविद्यावतारणां, वडवानलो लोभार्णवस्य, निकषोपलः शास्त्ररत्नानां, दावानलो रागपल्लवस्य, महामंत्रः क्रोधभुजङ्गस्य, दिवसकरो मोहान्धकारस्यार्गलाबन्धो नरकद्वाराणां, कुलभवनमाचाराणामायतनं मङ्गलानामभूमिर्मदविकाराणां, दर्शकः सत्पथानामुत्पत्तिः साधुताया नेमिरुत्साहचक्रस्याश्रयः सत्त्वस्य, प्रतिपक्षः कलिकालस्य, कोशस्तपसः, सखा सत्यस्य, क्षेत्रमार्जवस्य, प्रभवः पुण्यसंचयस्यादत्तावकाशो दैन्यस्यानायत्तो रोपस्यावशो विषयाणामनभिमुखः सुखानाम् । अस्य भगवतः प्रसादादेवोपशान्तवैरमपगतमत्सरं तपोवनम् । अहो प्रभावो महात्मनाम् । अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तात्मानस्तिर्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति । तथा हि एष विकचोत्पलवनरचनानुकारिणमुत्पतच्चारुचन्द्रकशतं हरिणलोचनद्युतिशबलमभिनवशाद्वलमिव विशति शिखिनः कलापमातपाहतो निःशङ्कमहिः । अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः प्रक्षरत्क्षीरधारमापिबति कुरङ्गशावकः सिंहीस्तनम् । एष मृणालकलापाशङ्किभिः शशिकरधवलं सटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमाणं मृगपतिः । इदमिह कपिकुलमपगतचापलमुपनयति मुनिकुमारकेभ्यः स्रातेभ्यः फलानि । एते च न निवारयन्ति मदांध्या अपि गण्डस्थलभाजि मदजलपाननिश्चलानि मधुकरकुलानि जातदयाः कर्णतालैः करिणः । किं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहुना । तापसाग्निहोत्रधूमलेखाभिरुत्सर्पन्तीभिरनिशमुपपादितकृष्णाजिनोत्तरासङ्गशोभाः फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इव लक्ष्यन्तेऽस्य भगवतः । किं पुनः सचेतनाः प्राणिनः ।

कादम्बरी ।

अभ्यासः—१ सामासिक शब्द करा—शैले शैले इति । रमा जाया यस्य सः । अर्धं रात्रेः । २ वाक्यांत योजा—इव, नाना, किमुत. ३ समास सोडवा—स्नातानुलिप्तः, अधिज्यधन्वा, गोव्याघ्रम् अविघ्नम्.

---

६२ युधिष्ठिरं प्रति द्रौपदीवाक्यम् ।

परिचयः—किरातार्जुनीय हें काव्य भारवि कवीनें रचिलें आहे. कालिदास, भवभूति यांच्याप्रमाणें हा प्रथितयश कवी आहे. **भारवेः अर्थगौरवम्** हें वचन प्रसिद्ध आहे.

संदर्भः—धर्मराजाला एक वनचर भेटला. त्यानें दुर्योधनाच्या राजनीतिनैपुण्याचें वर्णन धर्मराजापुढें केलें. नंतर तो निघून गेला. तो गेल्यावर द्रौपदीनें धर्मराजासमोर भाषण केलेलें पुढें दिलें आहे.

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पल्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥ १ ॥
निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ २ ॥
भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ ३ ॥
अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्वकं शजैः ।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥ ४ ॥
व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गाश्निशिता इवेषवः ॥ ५ ॥
गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ६ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवात्रिरुच्छिखः ॥ ७ ॥
अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ ८ ॥
परिभ्रमल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥ ९ ॥
विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन्करोति मन्युं न कथं धनंजयः ॥ १० ॥
वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥ ११ ॥
इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदां परां रुजन्ति चेतः प्रसभं ममाधयः ॥ १२ ॥
पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥ १३ ॥
पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥ १४ ॥
अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ १५ ॥
द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोप्युत्सव एव मानिनाम् ॥ १६ ॥
विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ १७ ॥
पुरःसरा धामवतां यशोधनः सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥ १८ ॥
अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कामुकं जटाधरः संजुहूधीह पावकम् ॥ १९ ॥
न समयपरिरक्षणं क्षमं ते निष्कृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि २०

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विधिसमयनियोगादीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मज्जमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ २१ ॥

किरातार्जुनीये प्रथमः सर्गः ।

अभ्यासः—१ ओळखा—तितीर्षवः, वक्ष्यमाणया, शिक्षति, तुष्टुविरे. २ संधि करा—अपतत्+शिलायात् । वाक्+हरिः । अहः+अहः । तत्+लक्षणम् । ३ समास सोडवा—मृत्युभीतः । मासजातः । देशान्तरम् । वर्षभोग्यः ।

---

६४ शुकनासोपदेशः ।

संदर्भः—दिग्विजयाकरितां निघण्यापूर्वी मुख्य प्रधान शुकनासास भेटण्याकरितां चंद्रापीड गेला असतां शुकनासानें त्यास तारुण्याचे व ऐश्वर्याचे अनर्थकारक प्रकार सांगून त्यास उपदेश केला.

एवं समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश । समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन्शुकनासः सविस्तरमुवाच ।

तात चन्द्रापीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमदः । कष्टमनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम् । अशिशिरोपचारहार्योऽत्यन्ततीव्रो दर्पदाहज्वरोष्मा । सततं अमूलमंत्रगम्यो विषमो विषयविषास्वादमोहः । नित्यमज्ञानशौचवध्यो बलवान् रागमलावलेपः । अजस्रं अक्षपावसानप्रबोधा घोरा च राज्यसुखसंनिपातनिद्रा भवति । इत्यतो विस्तरेणाभिधीयते ।

अनर्थपरम्परा ।

गर्भेश्वरत्वं अभिनवयौवनत्वं अप्रतिमरूपत्वं अमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा । सर्वाविनयानां एकैकमप्येषां आयतनम् । किमुत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समवायः । यौवनारम्भे हि प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः । अपहरति वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिः अतिदूरं आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः । इन्द्रियहरिणहारिणी सततमतिदुरन्ता इयमुपभोगतृष्णिका । नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः । नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु । भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः । अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य । कुसुमशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम् । गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमं अजलं स्नानम् । अनुपजातपलितादिवैरूप्यं अजरं वृद्धत्वम् । विशेषेण तु राज्ञाम् । विरला हि तेषामुपदेष्टारः । प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात् । उपदिश्यमाना अपि न शृण्वन्ति । शृण्वन्तोऽपि खेदयन्ति हितोपदेशदायिनो गुरून् । अलीकाभिमानोन्मादकारीणि धनानि । राज्यविषविकारतन्द्राप्रदा च राजलक्ष्मीः ।

लक्ष्मीमदः ।

आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् । इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात्पारिजातपल्लवेभ्यो रागं, इन्दुशकलादेकान्तवक्रतां, उच्चैःश्रवसश्चञ्चलतां, कालकूटान्मोहनशक्तिं, मदिराया मदं, कौस्तुभमणेरतिनैष्ठुर्यं इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता । न ह्येवंविधमपरमपरिचितमिह जगति किंचिदस्ति यथेयमनार्या । लब्धापि खलु दुःखेन परिपाल्यते । दृढगुणपाशसंदाननिष्पन्दीकृतापि नश्यति । उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृताप्यपक्रामति । मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालितापि प्रपलायते । न परिचयं रक्षति । नाभिजनमीक्षते । न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते । न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । नाचारं पालयति । न सत्यमनुबुध्यते । न लक्षणं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रमाणीकरोति । गन्धर्वनगरलेखेव पश्यत एव नश्यति । अद्यापि आरूढमन्दरपरिवर्तावर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति । कमलिनीसंचरणव्यतिकरलग्ननलिननालकण्टकेव न क्वचिन्निर्भरमावध्नाति पदम् । अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविधगन्धगजगण्डमधुपानमत्तेव परिस्खलति । पारुष्यमिवोपशिक्षितुमसिधारासु निवसति । विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम् । अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोपमण्डलमपि मुञ्चति भूभुजम् । लतेव विटपकानध्यारोहति । गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला । दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः । पातालगुहेव तमोबहुला । हिडिम्बेव भीमसाहसैकहार्यहृदया । प्रावृडिवाचिरद्युतिकारिणी । दुष्टपिशाचीव दर्शितानेकपुरुषोच्छाया स्वल्पसत्त्वमुन्मत्तीकरोति । सरस्वतीपरिगृहीतमीर्प्ययेव नालिङ्गति जनम् । गुणवन्तमपवित्रमिव न पश्यति । उदारसत्त्वममङ्गलमिव न बहु मन्यते । सुजनमनिमित्तमिव न पश्यति । अभिजातमहिमिव लङ्घयति । शूरं कण्टकमिव परिहरति । दातारं दुःस्वप्नमिव न स्मरति । विनीतं पातकिनमिव नोपसर्पति । मनस्विनमुन्मत्तमिवोपहसति । परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम् । तथा हि । सततमुष्माणमारोपयन्त्यपि जाड्यमुपजनयति । उन्नतिमादधानापि नीचस्वभावतामाविष्करोति । तोयराशिसम्भवापि तृष्णां संवर्धयति । ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति । बलोपचयमाहरन्त्यपि लघिमानमापादयति । अमृतसहोदरापि कटुकविपाका । विग्रहवत्यप्यप्रत्यक्षदर्शना पुरुषोत्तमरतापि खलजनप्रिया । रेणुमयीव स्वच्छमपि कलुषीकरोति । यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्गमति । तथा हि । इयं संवर्धनवारिधारा तृष्णाविषवल्लीनां, व्याधगीतिरिन्द्रियमृगाणां, परामर्शधूमलेखा सच्चरितचित्राणां, विभ्रमशय्या मोहदीर्घनिद्राणां, निवासजीर्णवलभी धनमदपिशाचिकानां, तिमिरोद्गतिः शास्त्रदृष्टीनां, पुरः पताका सर्वाविनयानां, उत्पत्तिनिम्नगा क्रोधावेगग्राहाणां, आपानभूमिर्विषयमधूनां, सङ्गीतशाला भ्रूविकारनाट्यानां, आवासदरी दोषाशीविषाणां, उत्सारणचेत्रलता सत्पुरुषव्याहाराणां, अकालप्रावृट् गुणकलहंसकानां, विसर्पणभूमि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लोकापवादविस्फोटकानां, प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणो, वध्यशाला साधुभावस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य । न हि तं पश्यामि यो ह्यपरिचितयाऽनया न निर्भरमुपगूढो यो वा न विप्रलब्धः । नियतमियमालेख्यगताऽपि चलति, पुस्तकमय्यपीन्द्रजालमाचरत्युत्कीर्णाऽपि विप्रलभते श्रुताप्यभिसंधत्ते चिन्तिताऽपि वञ्चयति ।

धनमदफलम् ।

एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः । सर्वाविनयाधिष्ठानतां च गच्छन्ति । तथाहि । अभिषेकसमय एवैषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम् । अग्निकार्यधूमेनेव मलिनीभवति हृदयम् । पुरोहितकुशाग्रसंमार्जनीभिरिवापनीयते क्षान्तिः । उष्णीषपट्टबन्धेनेवाच्छाद्यते जरागमनस्मरणम् । आतपत्रमण्डलेनेवापवार्यते परलोकदर्शनम् । चामरपवनैरिवापह्रियते सत्यवादिता । वेत्रदण्डैरिवोत्सार्यन्ते गुणाः । अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्तयो भवन्ति । तदवस्थाश्च व्यसनशतशरव्यतामुपगताः पतितमप्यात्मानं नावगच्छन्ति ।

अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रैर्द्यूतं विनोद इति, परदाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्यमिति, स्वदारत्यागोऽव्यसनितेति, गुरुवचनावधीरणमपरप्रणेयत्वमिति, दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणा वित्तमदमत्तचित्ताः सर्वजनस्योपहास्यतामुपयान्ति । आत्मविडम्बनां चानुजीविना जनेन क्रियमाणामभिनन्दन्ति । मिथ्याभाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः । न पूजयन्ति द्विजातीन् । न मानयन्ति मान्यान् । नार्चयन्त्यर्चनीयान् । नाभिवादयन्त्यभिवादनार्हान् । नाभ्युत्तिष्ठन्ति गुरून् । उपहसन्ति विद्वज्जनम् । जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय । कुप्यन्ति हितवादिने । सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तं मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति, तं बहुमन्यन्ते, तमाप्ततामापादयन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योऽहर्निशमनवरतमुपरचिताञ्जलिराधिदैवतमिव विगतान्यकर्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति ।

उपदेशः ।

तदेवंप्राये राज्यतंत्रेऽस्मिन्महामोहकारिणि च यौवने, कुमार, तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे विद्वद्भिः । यथा च न प्रतार्यसे कुशलैर्नावलुप्यसे सेवकवृकैर्न वञ्च्यसे धूर्तैर्न प्रलोभ्यसे वनिताभिर्न विडम्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विपयैर्नापहियसे सुखेन कामं भवान् प्रकृत्यैव धीरः । पित्रा च महता प्रयत्नेन समारोपितसंस्कारः । तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि । तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान् । इदमेव च पुनः पुनरभिधीयसे । विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीः । सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्यौवराज्याभिषेकमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम् । अवनमय द्विषतां शिरांसि । उन्नमय बन्धुवर्गम् । अभिषेकानन्तरं च प्रारब्धदिग्विजयस्तव पित्रा विजितामपि सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम् । अयं च ते कालः प्रतापमारोपयितुम् । आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति । इत्येतावदभिधायोपशशाम ।

कादम्बरी ।

अभ्यासः—१ ओळखा—धावं धावम्, मा कार्षीः, सज्जीकृतः । २ भस्मास्थिशकलाकीर्णा, प्रतिदिनम्, शरीरजम् । ३ वाक्यांत योजा—सार्धम्, यथा तथा, किमुत, नो चेत्. ४ प्रयोग बदला—तयापि कन्यकया प्रणयः कृतः । मुनिः मूषिकायै रविं दर्शयति । सर्वशैलाः धरित्रीं रत्नानि दुदुहुः ।

६५ कौत्साय गुरुदक्षिणाप्रदानम् ।

संदर्भः—रघुराजानें पृथ्वी जिंकल्यावर मिळविलेलें सर्व धन प्रजेच्या कल्याणार्थ विश्वजित् यज्ञ करून दान दिलें. सर्व गृहकृत्यें करण्यांत तो मातीची भांडीं वापरी. अशा स्थितींत वरतंतुशिष्य कौत्स गुरुदक्षिणेकरितां द्रव्य मिळविण्यास रघुराजाकडे आला.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥
स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥ २ ॥
तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ॥ ३ ॥
अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥ ४ ॥
कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि ।
आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ ५ ॥
आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ॥ ६ ॥
क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥ ७ ॥
निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम् ।
तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ॥ ८ ॥
नीवारपाकादिकडंगरीयैरामृश्यते जानपदैर्न कच्चित् ।
कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ॥ ९ ॥
अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥ १० ॥
तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्माम् ।११।
इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥ १२ ॥
सर्वत्र नो वार्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥ १३ ॥
भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयाऽतिशेषे ।
व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥ १४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥ १५ ॥
स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥१६॥
तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।
खस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥१७॥
एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त ॥ १८ ॥
ततो यथावद्विहिताध्वराय तस्मै स्वयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥ १९ ॥
समाप्तविद्येन मयाऽमहर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥२०॥
निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ॥ २१ ॥
सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥ २२ ॥
इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥ २३ ॥
गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥ २४ ॥
स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं यतिष्ये ॥ २५ ॥
तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ २६ ॥
वसिष्ठमन्त्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु ।
मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ॥ २७ ॥
अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् ।
सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥ २८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः ।
हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ॥ २९ ॥
तं भूपतिर्भासुरहेमराशिं लब्धं कुवेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥ ३० ॥
जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ॥ ३१ ॥
अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन् करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ॥ ३२ ॥
किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥ ३३ ॥
आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥ ३४ ॥
इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ॥ ३५ ॥

---

६६ छात्रोपदेशः

संदर्भः—तैत्तिरीयोपनिषदांतील शीक्षाध्यायांत वेदाध्ययन केलेल्या शिष्याला आचार्य व्यवहारांतील वागणुकीचा उपदेश करतात. सर्व वाङ्मयांत या उपदेशाला शाश्वत स्थान मिळावें असा हा उतारा आहे.

वेदमनूच्य आचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । नो इतराणि । ये के चास्मच्छ्रेयांसो ब्राह्मणाः । तेषां त्वया आसनेन प्रश्वसितव्यम् । श्रद्धया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्त्तेथाः । एष आदेशः । एष उपदेशः ।

एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु-चैतदुपास्यम् ।

---

६७ प्रार्थना ।

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ १ ॥

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ २ ॥

वाङ्मयाकृष्टरत्नानां रत्नहारेण भास्वती ।
असौ प्रसन्ना वाग्देवी सर्वदा वरदाऽस्तु नः ॥ ३ ॥

---

६८ शान्तिः ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि-नावधीतमस्तु मा विद्विषावहै । ओम् शान्तिः शान्तिः शान्तिः ।

इति शम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

— बालबोधिनी —

१ मङ्गलाचरणम् ।

आर्तिः—दुःख. अधमर्षिणी—पाप नाहींसें करणारी. परत्र—परलोकीं. भास्—कांति. आयत—विस्तीर्ण. आकृष्टः—काढलेला. कल्पेत—होईल. छात्रः—विद्यार्थी. प्रविविक्षुः—प्रवेश करण्याची इच्छा करणारा.

२ राजा विष्णुशर्मणे पुत्रान् समर्पयति ।

पाटलिपुत्रम्—पाटणा शहर. उपेत—युक्त. परोक्षार्थः—दृष्टीस न पडणारा पदार्थ. उन्मार्गगामी—वाईट मार्गानें जाणारा. उद्विग्नमनाः—खिन्न अंतःकरण झालेला. परिवर्तिन्—चक्राप्रमाणें भ्रमण करणारा. किंशुकः—पळसाचें झाड. काञ्चनम्—सोनें. मारकतीं द्युतिर्म्—पाचमण्याचें तेज. अभिज्ञः—पण्डित. अश्मन्—दगड.

३ नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।

नीवारकणाः—तांदुळाचे दाणे. क्रोडः—छाती, वक्षःस्थल. न पलायिष्यते—जाणार नाहीं.

४ उपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत् ।

विलापः—दुःख, शोक. नकुलः—मुंगूस; न कुलं अस्य नकुलः । पङ्क्तिक्रमेण—रांगेनें. व्यापादयितव्यः—मारावा. अनुष्ठिते—केलें असतां.

५ रघुवंशप्रस्तावना ।

सम्पृक्त—जुडलेलें, चिकटलेलें. प्रतिपत्तिः—ज्ञान. पितरौ—माता च पिता च पितरौ; एकशेषद्वंद्व. तितीर्षुः—तरून जाण्याची इच्छा करणारा; इच्छादर्शक नाम. उडुपेन—नावेनें. प्रांशुलभ्यं—उंच मनुष्यास प्राप्त होणारें. उद्बाहुः—उंच हात करणारा. वामनः—ठेंगु मनुष्य; (खर्वोह्रस्वश्च वामनः इत्यमरः) सूरिः—पंडित. वज्रसमुत्कीर्णः—वज्रानें छिद्र पाडलेला. नाकः—स्वर्ग. वर्त्मन्—मार्ग. यथाकामम्—इच्छा असेल त्याप्रमाणें. यथाकालप्रबोधी—वेळेवर जागा असलेला. संभृत—सांठविलेला. विजिगीषुः—जय मिळविण्याची इच्छा करणारा. गृहमेधिन्—लग्न केलेला; (गृहैः दारैः मेधते संगच्छते असौ गृहमेधी). वार्द्धकं-वृद्धानां समूहः भावो वा; वार्द्धकम्—वृद्धपणा.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योगेन—समाधियोगानें. रघूणाम्—रघुकुलोत्पन्न राजांचा; कुलवाचक नामें बहुवचनी उपयोगांत आणलीं म्हणजे त्या कुलांत जन्मलेले असा अर्थ होतो; उदा० जनकानां रघूणां च संबंधः कस्य न प्रियः। (उत्तरराम०) हेमन्—सोनें. श्यामिका—काळेपणा.

६ अतिलोभाद्वको मृतः।

कुलीरकः किंवा कुलीरः—खेकडा. धीवरः—कोळी. यथाकर्तव्यम्—काय करावें तें. एकैकशः—एकेकाला. पञ्चत्वं गतः—मेला.

७ मालविकाग्निमित्रप्रस्तावना।

नान्दी—मंगलाचरण. नेपथ्यम्—नाटकांतील पात्रांची वेषभूषा करण्याची जागा. मारिषः—सभ्य गृहस्थ, नाटकांत सभ्य गृहस्थास हांक मारण्याकरितां योजतात. अभिहितः अस्मि—मला सांगितलें आहे. परिषद्—सभा. वस्तु—विषय. कालिदासग्रथितवस्तु—कालिदासानें रचिलेलें नाटक. प्रथित—प्रसिद्ध. प्रबंधः—ग्रंथ. विवेकश्रान्तम्—विचारपूर्ण. अवद्यम्—निंद्य. परप्रत्ययनेयबुद्धिः—दुसऱ्याच्या अनुभवाप्रमाणें वागणारा. परिजनः—सेवकलोक.

८ सिंहशशकयोः।

उपढौकयामः—आम्ही पाठवूं; उप+ढौक्-देणें, धाडणें. अभिमतम्—मान्य. उपकल्पित—दिलेला. शशकः—ससा. अनुनयः—मनधरणी. गभीर—खोल. आध्मात—पूर्ण भरलेलें. दर्पः—गर्व.

९ पण्डितलक्षणानि।

प्रशस्त—स्तुत्य. दर्पः—ताठा. ह्रीः—लज्जा. स्तम्भः—अडथळा. अर्थः—विषय, उद्दिष्ट. कृत्यं—करावयाची गोष्ट. संसारिणी प्रज्ञा—व्यवहारी बुद्धी, स्वभावतः अस्थिर असलेली. चिकीर्षन्ति—करण्याची इच्छा करतात. क्षिप्रं—लवकर. कामात्—स्वेच्छेनें, विषयाच्या इच्छेनें. असंपृष्टः—विचारल्याशिवांचून. न व्युपयुङ्क्ते—वाणीचा उपयोग करीत नाहीं; बोलत नाहीं. कर्मणः अन्तः न वसति—काम पुरें होण्याच्या आंत थांबत नाहीं. भूतिकर्म—ऐश्वर्य मिळवून देणारा उद्योग. योगज्ञः—युक्ति जाणणारा. प्रवृत्तवाक्—अस्खलित वाणीचा. चित्रकथः—नाना प्रकारच्या गोष्टी सांगणारा. ऊहवान्-तर्क जाणणारा. श्रुतं—विद्या, ज्ञान. असंभिन्नार्यमर्यादः—आर्यांची मर्यादा न मोडणारा.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१० शक्तेर्युक्तिर्बलीयसी ।

वञ्चकः—लबाड, धूर्त. दृष्टिप्रसादं—कृपादृष्टी, मेहेरबानी. निरूपितः—सांगितलेला. अभिजनः—कुल, वंश. लग्नवेला—मुहूर्त, शुभ वेळ. प्रत्ययः—विश्वास.

११ नीलवर्णस्य शृगालस्य ।

नीलीभाण्डम्—निळ्या रंगानें भरलेलें भांडें. अपसारितः—घालवून दिला; फेकून दिला. आवृत—चोहोकडून वेढलेला. मा विषीदत—दुःख करूं नका. विधेयम्—करावें. विप्रलब्धाः—फसविले गेलेले. महारावः—महत्+आरावः—मोठा शब्द.

१२ मूढलक्षणानि ।

अश्रुतः—अविद्वान्, मूर्ख. समुन्नद्ध—गर्विष्ठ. प्रेप्सुः—मिळविण्याची इच्छा करणारा. अकामान् कामयति—प्रेम न करणाऱ्यांवर प्रेम करतो. परं क्षिपति दोषेण—दुसऱ्याचे दोष काढतो. अनीशानः—अंगांत सामर्थ्य नसणारा नैष्कर्म्यम्—निरुद्योगीपणा, आळस. शून्यं उपासते—निरुत्साही मनुष्याची सेवा करतो किंवा शून्य—राजदारादीन् उपासते—राजस्त्रियांची सेवा करतो (नीलकंठी टीका). कदर्यः—कृपण मनुष्य. असंविभज्य भृत्येभ्यः—अवलंबून असलेल्या सर्वांना त्याचा वांटा न देतां.

१३ त्रयाणां मत्स्यानाम् ।

अनागतविधाता—प्रथमच उपायाची योजना करणारा. प्रत्युत्पन्नमतिः—संकट आलें असतां उपाय योजणारा. अन्वेषितः—शोधिला. कुलिशपातोपमं-वज्राघाताप्रमाणें. दुर्गः—किल्ला; जाण्यास कठीण असें आश्रयस्थान. कापुरुषः-दुर्जन. पितृपैतामहिकं—वडिलोपार्जित, वंशपरंपरागत. विसर्जितः—टाकलेला. प्रतिभाति—योग्य वाटतें.

१४ अज्ञातकुलशीलस्य वासो न देयः ।

पर्कटीवृक्षः—पिंपळ. दैवदुर्विपाकात्—दुर्दैवामुळें. विपाकः—परिणाम. शावकान्—पिलांना. कोलाहलः—गोंगाट. यथोचितं—त्या वेळेला योग्य असेल तें. चान्द्रायणव्रतं—चंद्राच्या कलाप्रमाणें जेवणाचे घास चढविणें अगर उतरविणें; उदा० शुक्लपक्षांत द्वितीयेस दोन घांस, दशमीस दहा, पौर्णिमेस पंधरा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च कृष्णपक्षांत तसेच कमी करणें. धर्मज्ञानरत—धर्म जाणण्यांत गढलेला. तृणानि—दर्भासन. भूमिः—बसावयास जागा. उच्छिद्यन्ते—नाहींशा होतात. भूमिं स्पृष्ट्वा कणौं स्पृशति—जमिनीस स्पर्श करून कानास हात लावतो; कानांवर हात ठेवतो. वीतरागः—निरिच्छ; वि + इत + रागः तरुकोटरे—झाडाच्या ढोलींत. जिज्ञासा—जाणण्याची इच्छा, शोध. निरूपयद्भिः—निरूपयंत्-शोधणारा.

१५ ययातितारुण्यम् ।

वार्षपर्वणी—वृषपर्वा नामक दैत्याची मुलगी. कविः—शुक्राचार्य त्वद्वयसा—तुझ्या आयुष्यानें. प्रत्याख्यानं—त्याग. प्रवणमतिः—नम्र बुद्धीचा. विनयशील. अनुदिनं—दररोज. कृष्णवर्त्मा—अग्नी.

१६ भोजनसमारंभः ।

ससंभ्रमम्—घाईनें. कृताञ्जलिपुटः—हात जोडून. रङ्गावलिः—रांगोळ्या. राजन्यं—क्षत्रियगण. चूडा—शिखर, डोक्यावरील केंस, जावळ, शेंडी. अगरु—चन्दन विशेष. परिहासः—थट्टा. श्रोत्राभिराम—कानाला गोड लागणारें. निरीक्षवन्तः—पाहाणारे. एला—वेलची. वीटिकासंछेदनं—विड्या तोडणें. वारविलासिनी—वारांगना, वेश्या.

१७ यौवनप्रभावः ।

निर्विकार—कोणताही विकार न होतां. शैशवं—बाळपण. स्नेहः—प्रेम. उपचीयते—वृद्धिंगत होतो. दोर्द्वयं—बाहुद्वय, दोन्ही हात. आपद्यते—प्राप्त होते. मध्येन इव—कमरेप्रमाणें. काश्यं—बारीकपणा. श्रुतं काश्यं उपयाति—ज्ञान नाहींसें होतें. उरुयुगलं—मांड्या. श्मश्रुः—मिशा दाढी. उज्जृम्भते—वाढते. सरागः—तांबूस. अनुपहते श्रोत्रे—कान शाबूद असूनहि. आसंगः—आसक्ति. सरसता—रसिकपणा, ओलेपणा. वर्षातिवृद्ध्या—फार पावसानें, दोषागमः—अवगुणप्राप्ति, रात्र पडणें. असदर्शनं—खरें न दिसणें. स्खलति—चुकतें. त्रपा—लज्जा. आवरणं-आच्छादन. कुसुमधन्वा—मदन. सायकः—बाण.

१८ नन्दिनीहरणम् ।

कुशिकः—कुशिक नांवाचा राजा. आत्मसंभवः—मुलगा. विश्रुतः—प्रसिद्ध. बलम्—सैन्य. व्यायामकर्शितः—मृगयेच्या श्रमानें थकलेला.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पिपासार्दितः—तहानेनें व्याकुळ झालेला. अर्बुद—दहा कोटी. याज्यार्थं—यज्ञाकरितां. तपःस्वाध्यायसाधनः—तप व अध्ययन हेंच साधन असलेला. बाहुवीर्यः—आपल्या हातांमध्यें सामर्थ्य असलेला. हंसचन्द्रप्रतीकाशां—हंस वा चंद्र याप्रमाणें शुभ्र. कशा—चाबूक. प्रणुदिता—हांकलून नेलेली. काल्यमाना—हांकलली जाणारी. रवः—शब्द. क्रोशन्ती—हंबरणारी. घोर—भयंकर. उपेक्षसे—दुर्लक्ष करतोस. धर्षिता—जबरदस्तीनें नेली जाणारी. धृतव्रतः—व्रत घेतलेला. रौद्रदर्शना—भयंकर दिसणारी. व्यद्रावयत्—तिनें पळवून लावले. फेनतः—पेंसापासून. पुलिंदाः—म्लेंच्छजातिविशेष. हूणाः—हूणदेशांतील लोक. अवाकीर्यत—उधळून लावले. आविष्टः—व्याप्त. नाराचः—बाण. वैणवेन—बांबूच्या काठीनें. अपोह्य—दूर करून. व्रीडाढ्यः—लज्जायुक्त. विद्रावितं—पळविलेलें. निर्विण्णः—दुःखी. स्फीत—भरभराटलेलें.

१९ सावित्रीकथा प्रथमो भागः ।

मद्रेषु—मद्रदेशांत. देशवाचक शब्द बहुवचनांत योजितात. शरण्य—शरणे साधुः शरण्यः । रक्षण करणारा. संधा—प्रतिज्ञा. जनपदः—देश. प्रतिनिवारितः—निवारण केलेला. प्रदानकालः—विवाहकाल. न वृणोति—पसंत करीत नाहीं. त्रिदिवः—स्वर्ग. स्नुषार्थे—सून म्हणून. परिच्छदाः—लवाजमा. आभरणं—अलंकार. शुश्रूषा—सेवा. नक्तंदिवम्—रात्रंदिवस. निशम्य—ऐकून. व्यावर्तयितुम्—माघारें फिरविण्याकरितां.

२० भृत्यगुणाः ।

